
Library Reg. No.
INDIA

A DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS

IN THE

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

BY

M. RANGACHARYA, M.A., RAO BAHADUR,
PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE, AND CURATOR, GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

AND


S. KUPPUSWAMI SASTRI, M.A.,
PRINCIPAL, SANSKRIT COLLEGE, TIRUVADI, AND AG. PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE, AND AG. CURATOR, GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

Prepared under the orders of the Government of Madras.

VOL. XVI—RELIGION—(*continued*) VRATA AND PŪJĀ.

MADRAS:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

1913.



CONTENTS.

CLASS VIII.

RELIGION—(*continued*).

7. VRATA AND VRATAKALPA.

7. VRATA AND VRATAKALPA—(*continued*).

7. VRATA AND VRATAKALPA—(*continued*).

7. VRATA AND VRATAKALPA—(continued).

8. (a) PŪJĀ (VĒDIC AND TĀNTRIC).

8. (a) PŪJĀ (VĒDIC AND TĀNTRIC)—(*continued*).

8. (b) PŪJĀ (JAINISM).

8. (b) PŪJĀ (JAINISM)—(*continued*).

A DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS.

VOLUME XVI.

CLASS VIII.—RELIGION—(*continued*).

(7) VRATA AND VRATAKALPA.

The Vratas are mainly the vowed worship of certain deities with the object of propitiating them and attaining certain ends kept in view. These rites are prescribed in the Purāṇas and are observed chiefly by women, and consist of fasting, worshipping the intended deity and feeding the Brahmins

It is prescribed that, after observing any Vrata for a definite period, one should complete the course by means of a ceremonial called Udyāpana, the chief features of which are: (1) consecration of vessels of water in which the deity worshipped is invoked to be present, (2) fire-offerings, (3) hospitality and obeisance to Brahmin couples, and (4) ten kinds of gifts Generally there is narrated a legendary tale illustrating the importance of each Vrata.

No. 8166. अखण्डदीपोद्यापनविधिः.
AKHAṆḌADĪPŌDYĀPANAVIDHIḤ.

Substance, palm-leaf. Size, $13\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 4. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete.

Begins on fol. 39*a*. The other works herein are: Śivarātrivratōdyāpana 1*a*, Kṛṣṇajayantīvratakalpa 7*a*, Varalakṣmikalpa 14*a*, Sarasvatīkalpa 27*a*, Ṛṣipañcamīkathā 31*a*, Mahāgaṇapativratōdyāpana 41*a*, Prāṇapratiṣṭhā 49*a*, Śukraśānti 51*a*, Vināyakavratakalpa 53*a*.

Deals with the manner of performing the Vrata of lighting a sacred lamp when the moon is in the asterism called Kṛttikā. This Vrata is conducted with a view to propitiate Viṣṇu in order to get rid of blindness.

Beginning :

अथातोऽखण्डदीपोद्यापनविधिं व्याख्यास्यामः—

महानद्यां स्नात्वा नित्यकर्म समाप्य चतुरश्रं मण्डपं कृत्वा तन्मध्ये भारमात्रं धान्यं निक्षिप्य । . . . .
सङ्कल्प्य मयाचरितस्य कृत्तिकाखण्डदीपस्य सम्पूर्णफलावाप्त्यर्थम् ।

End :

ब्राह्मणान् भोजयित्वाशिषो वाचयित्वा—इत्याह भगवान् ब्रह्मा ॥

Colophon :

कृत्तिकाखण्डदीपोद्यापनविधिस्समाप्तः ॥

No. 8167. अनन्तव्रतकथा.

ANANTAVRATAKATHĀ.

Substance, palm-leaf. Size, $13\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 5. Lines, 5 on a page. Character, Nandināgarī. Condition, much injured. Appearance, old.

Begins on fol. 111*b*. The other works herein are Vratārka 1*a*, Varalakṣmīvrata 106*a*, Yamunāpūjā 109*a*, Anantavratapūjāvidhāna 110*a*.

Almost complete.

Relates the story of how the Pāṇḍavas, while in exile in the forest, performed the Anantavrata on the advice of Śrī Kṛṣṇa and got back their kingdom. The Vrata is intended to propitiate the serpent-god Ananta or Ādiśeṣa, and may be performed by men as well as women. It is observed on the fourteenth day of the bright lunar fortnight of the Bhādrapada month.

Beginning :

सूत उवाच—

अरण्ये वर्तमानास्ते पाण्डवा दुःखकर्शिताः ।
कृष्णं दृष्ट्वा महात्मानं प्रणिपत्य यथाक्रमम् ॥

श्रीयुधिष्ठिरः—

अहं दुःखीह सञ्जातो भ्रातृभिः परिवारितः ।
कथं मुक्तिर्भवेदस्माकमनन्तात् दुःखसागरात् ॥

श्रीकृष्ण उवाच—

अनन्तव्रतमाहात्म्यं व्रतं पापहरं शुभम् ।
सर्वकामप्रदं नृणां स्त्रीणाञ्चैव युधिष्ठिर ॥
शुक्लपक्षे चतुर्दश्यां मासि भाद्रपदे शुभे ।
तस्यानुष्ठानमात्रेण सर्वपापैः प्रमुच्यते ॥

End :

ते सर्वे पापनिर्मुक्ता (मुक्तिं यान्ति न) संशयः ॥

No. **8168.** अनन्तव्रतकल्पः.

ANANTAVRATAKALPAḤ.

Substance, palm-leaf. Size, 13¾ × 1¼ inches. Pages, **20**. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

Begins on fol. 26*a*. The other works herein are Lakṣmīnārāyaṇavrata 1*a*, Vināyakavratakalpa 11*a* and 18*a*, Varalakṣmīvratakalpa 23*a*, Sūryanārāyaṇavrata 36*a*, Durgākalpa 51*a*.

This is found in the Bhaviṣyōttarapurāṇa, and deals with the details connected with the performance of the Anantavrata.

Beginning :

एवङ्गुणेत्यादिस्कन्दपुराणोक्तानन्तव्रताङ्गयमुनापूजां करिष्ये—

कलशान् पूजयेत्सर्वान् गङ्गातोयसपल्लवान् ।
सर्वे समुद्रास्सरितः तीर्थानि च ह्रदा नदाः ॥

* * * *

कृत्वा दर्भमयं देवं परिधानसमन्वितम् ।
फणासप्तान्वितानन्तं पिङ्गाक्षं च चतुर्भुजम् ॥

* * * *

सूत उवाच—
अरण्ये वर्तमानास्ते पाण्डवा दुःखकर्शिताः ।
कृष्णं दृष्ट्वा महात्मानं प्रणिपत्य यथाक्रमम् ॥
युधिष्ठिर उवाच ।

End:

ये तु शृण्वन्ति सततं पठ्यमानं नरोत्तमाः ।
ते सर्वे पापनिर्मुक्ता यास्यन्ति परमां गतिम् ॥

Colophon:

इति भविष्योत्तरपुराणे अनन्तव्रतकल्पं सम्पूर्णम् ॥

No. 8169. अनन्तव्रतकल्पः.
ANANTAVRATAKALPAḤ.

Pages, 19. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 5765

Complete.

Same as the above.

No. 8170. अनन्तव्रतकल्पः.
ANANTAVRATAKALPAḤ.

Pages, 22. Lines, 5 on a page.

Begins on fol. 97*a* of the MS. described under No. 3055.

Complete.

Same as the above.

No. 8171. अनन्तव्रतकल्पः.
ANANTAVRATAKALPAH.

Substance, palm-leaf. Size, 9 × 1 inches. Pages, 34. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Complete.

Begins on fol. 66a. The other works herein are Śravaṇadvādaśīvratakalpa 1a, Śravaṇadvādaśīvratōdyāpana 19b, Dānāphalavrata 25a, Svarṇagaurīvrata 46a, Varalakṣmīvrata 50a, Yamunāpūjā 61a, Sarvatōbhadra 64a, Naṣṭadōrīprāyaścitta 82b, Mahānavamīpūjā 85a, Kṛṣṇajayantīvratakalpa 8?a, Daśaphalavratakathā 98a, Ṛṣipañcamīvratakalpa 101a, Lakṣavartivrata 111a, Vināyakavratakalpa 118a.

Similar to the above.

Beginning:

ततस्तु मूलमन्त्रेण नमस्कृत्य चतुर्भुजम् ।
नवाम्रपल्लवाभासं पिङ्गलश्मश्रुलोचनम् ॥
पीताम्बरधरं देवं शङ्खचक्रगदाधरम् ।
अलङ्कृतं महारत्नैस्तत्स्वरूपं विचिन्तयेत् ॥ ध्यानम्—
मूलमन्त्रेण कलशं संस्थाप्य दोरकं विनिक्षिपेत् ।
ओं नमो भगवते वासुदेवाय—इति मूलमन्त्रः ।
आगच्छानन्त देवेश तेजोराशे जगत्पते ।
इमां मया कृतां पूजां गृहीष्व सुरसत्तम ॥ आवाहनम् ।

See under No. 8169 for the end.

No. 8172. अनन्तव्रतकल्पः.
ANANTAVRATAKALPAH.

Pages, 11. Lines, 7 on a page.

Begins on fol. 1a of the MS. described under No. 3105, wherein this is shown as Anantavratakathā.

Wants beginning.

Similar to the above.

Beginning:

पक्षमासस्तु(र्तु)वर्षाणि युगकल्पव्यवस्थया ।
योऽयं कालो मया ख्यातस्सोऽनन्त इति विश्रुतः ॥
सोऽयं कालोऽवतीर्णेन भुवो भारावतारणात् ।
दानवानां विनाशाय वसुदेवकुलोद्भव ॥

* * * *

अनन्तव्रतमाहात्म्यं विधिं विधिमतां(विदां) वर ।
किं पुण्यं किं फलं तस्य किं दानं कस्य पूजनम् ॥

End:

ये तच्छृण्वन्ति वै ख्यातं ये पठन्ति नरोत्तमाः ।
ते सर्वे पापनिर्मुक्ता यास्यन्ति परमां गतिम् ॥

Colophon:

इति श्रीभविष्योत्तरपुराणे अनन्तव्रतकल्पं सम्पूर्णम् ॥

No. **8173.** अनन्तव्रतकल्पः.

ANANTAVRATAKALPAH.

Pages, 17. Lines, 5 on a page. Character, Nandināgarī.

Begins on fol. 1*a* of the MS. described under No. 4131, wherein this is shown as Anantavratakatha.

Wants beginning and end.

Same as the above.

No. **8174.** अनन्तव्रतकल्पः.

ANANTAVRATAKALPAH.

Pages, 35. Lines, 6 on a page.

Begins on fol. 29*a* of the MS. described under No. 6152.

Complete.

Similar to the above.

Beginning:

पूर्वोक्तिवङ्गुणविशेषणविशिष्टायां शुभतिथौ श्रीमदनन्तपद्मनाभप्रेरणया श्रीमदनन्तपद्मनाभप्रीत्यर्थं कल्पोक्तप्रकारेण ध्यानावाहनादिषोडशोपचार· पूजां करिष्ये.

कृत्वा दर्भमयं देवं परिधानसमन्वितम् ।
फणासप्तान्वितानन्तं पिङ्गलाक्षं चतुर्भुजम् ॥

End:

य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ।
सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥

Colophon:

इति श्रीभविष्योत्तरपुराणे कृष्णयुधिष्ठिरसंवादे श्रीमदनन्तव्रतकल्पं सम्पूर्णम् ॥

No. **8175.** अनन्तव्रतकल्पः.

ANANTAVRATAKALPAḤ

Pages, 24. Lines, 5 on a page.

Begins on fol. 36*a* of the MS. described under No. 2908.

Complete.

Same as the above.

No. **8176.** अनन्तव्रतकल्पः.

ANANTAVRATAKALPAḤ.

Pages, 18. Lines, 5 on a page.

Begins on fol. 30*a* of the MS. described under No. 2907.

Complete.

Similar to the above.

Beginning:

कृत्वा दर्भमयं देवं परिधाय(न)समन्वितम् ।
फणासप्तान्वितानन्तं पिङ्गाक्षं च चतुर्भुजम् ॥
दक्षिणोर्ध्वकरे पद्मं शङ्खं तस्याप्यधः करे ।

चक्रमूर्ध्वकरे पद्मगदा(मधो) वामे गदादयः ॥
अनन्तध्यानसंस्थानं कथितं ब्रह्मवित्तमैः ।
कलशस्थापनम् ।

End:

ये च शृण्वन्ति सततं वाच्यमानं द्विजोत्तमैः ।
सर्वपापविनिर्मुक्ता यास्यन्ति परमां गतिम् ॥

Colophon:

इति श्रीभविष्योत्तरपुराणे अनन्तव्रतकल्पं सम्पूर्णम् ॥

No. **8177.** अनन्तव्रतकल्पः.

ANANTAVRATAKALPAH.

Substance, palm-leaf. Size, 13⅞ × 1⅝ inches. Pages, 14. Lines, 8 on a page. Character, Kanarese. Condition, slightly injured. Appearance, old.

Begins on fol. 20a. The other works herein are Vināyakavrata 1a, Siddhivināyakavrata 8a, Ṛṣipañcamīvrata 12b, Yamunāpūjā 19a, Naṣṭadōraprāyaścitta 26b and 27a, Anantavratōdyāpanakalpa 28a, Gōpadmavrata 36b, Viṣṇusahasranāma 40a, Sōmavāravrata 51a, Varalakṣmīvrata 59a, Lakṣavartivratōdyāpana 64a, Kṛṣṇajayantīvratakalpa 67a, Vināyakavratakalpa 76a, Ṛṣipañcamīvrata 91a, Varalakṣmīvratakalpa 108a.

Complete.

Same as the above.

No. **8178.** अनन्तव्रतकल्पः.

ANANTAVRATAKALPAH.

Substance, palm-leaf. Size, 14⅞ × 1⅝ inches. Pages, 8. Lines, 4 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Begins on fol. 5a. The other works herein are Yamunāpūjā 1a, Anantavratōdyāpanakalpa 9a, Kēdāravrata 15a, Varalakṣmīvratakalpa 1 a, Nṛsiṁhajayantīkalpa 22a, Kēdāravratakalpa 27a.

Complete.

Same as the above.

No. 8179. अनन्तव्रतकल्पः.

ANANTAVRATAKALPAḤ.

Substance, palm-leaf. Size, 11¾ × 1¼ inches. Pages, 23. Lines, 5 on a page. Character, Nandināgari. Condition, injured. Appearance, old.

Begins on fol. 41*a*. The other works herein are Dānaphalavratakalpa 1*a* and 61*a*, Gōpadmavrata 14*a*, Gōpadmavratōdyāpana 15*a*, Kṛṣṇajayantyaṣṭamīvratakalpa 17*a*, Siddhivināyakavratakalpa 21*a*, Siddhivināyakavrata 29*a*, Varalakṣmīvrata 31*a*, Umāmahēśvaravrata 33*b*, Budhāṣṭamīvrata 52*b*, Budhāṣṭamīvratōdyāpana 59*b*, Daśāphalavrata 64*a*, Ṛṣipañcamīvratakalpa 65*b*, Bindudvādaśīvratakalpa 73*b*, Tulasīpadmavrata 75*a*, Rāmajayantīpūjā 76*a*, Svarṇagaurīvrata 79*a*.

Complete.

Similar to the above.

Beginning:

एवङ्गुणविशेषणविशिष्टायां तिथौ मम वर्षे वर्षे प्रयुक्ताचरितव्रतकल्पोक्तसम्पूर्णसमग्रसकलफलावाप्त्यर्थमनन्तव्रताङ्गयमुनापूजां करिष्ये ।

क्षीरोदार्णवसंभूते इन्द्रनीलचतुर्भुजे ।

* * * *

युधिष्ठिर उवाच—

अनन्तव्रतमाहात्म्यं विधिं (कथं) विधिविदां वर ।
किं पुण्यं किं फलं तस्य ह्यनुष्ठानवतां नृणाम् ॥

End:

ये(च)श्रृण्वन्ति सततं वाच्यमानं नरोत्तमैः ।
ते सर्वे पापनिर्मुक्ता यास्यन्ति परमाङ्गतिम् ॥

Colophon:

इति श्रीभविष्योत्तरपुराणे अनन्तव्रतकल्पस्सम्पूर्णः ॥

No. 8180. अनन्तव्रतकल्पः.

ANANTAVRATAKALPAḤ.

Substance, palm-leaf. Size, 15½ × 1¼ inches. Pages, 19. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 6a. The other works herein are Vināyakavratakalpa 1a, Naṣṭadōraprāyaścitta 16a, Anantavratōdyāpanavidhi 17a, Kṛṣṇajayantīvratakalpa 21a, Daśaphalavrata 26a, Sarasvatīpūjākalpa 30a, Svarṇagaurīvrata 36a.

Complete.

Similar to the above.

Beginning:

ममोपात्त—प्रीत्यर्थमेवङ्गुण—शुभतिथौ अनन्तपद्मनाभपूजाङ्गयमुना-पूजां करिष्ये—

क्षीरोदार्णवसम्भूते क्षीरार्णवनिवासिनि ।
त्वत्प्रसादान्महादेवि विष्णुपत्न्यै नमोऽस्तु ते ॥ ध्यानम् ।

* * * *

कृत्वा दर्भमयं देवं परिधानसमन्वितम् ।
फणासप्तान्वितानन्तं पिङ्गलाक्षं चतुर्भुजम् ॥

* * * *

अनन्तपद्मनाभस्वामिने नमः—ध्यायामि ।

End:

ये च शृण्वन्ति सततं पठ्यमानं पठन्ति ये ।
तेऽपि पापविनिर्मुक्ताः संप्राप्स्यन्ति हरेः पुरम् ॥

Colophon:

इति हेमाद्रिव्रतखण्डे भविष्योत्तरपुराणे अनन्तव्रतकल्पः सम्पूर्णः ॥

No. 8181. अनन्तव्रतदोरनाशप्रायश्चित्तम्.

ANANTAVRATADŌRANĀŚAPRĀYAŚCITTAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 54*b* of the MS. described under No. 3105.

Complete.

On the expiatory ceremony to be performed in case the string, which is tied round the arm during the observance of the **Anantavrata**, is lost by accident.

Beginning:

वसिष्ठ उवाच—

अनन्तव्रतमाहात्म्यं बहुश्रुत मया श्रुतम् ।
दोररूपेण वानन्तो रक्षतीति सुरोत्तमः ॥
प्रमादाद्विपदो वापि दोरे नष्टे व्रतस्य तु ।
तदानीं करणीयं किं वद त्रैलोक्यपालक ॥

End:

अर्चयेच्चन्दनाद्यैश्च सुमनोभिश्च पूर्ववत् ।
शान्तिहोममिमं कृत्वा पुण्याहमिति वाचयेत् ॥
विष्णोराराधनं कुर्यात् अनन्तमपि हैमिकम् ।
. . . मिमं कृत्वा पूर्ववद्व्रतमाचरेत् ॥

No. 8182. अनन्तव्रतदोरनाशप्रायश्चित्तम्.

ANANTAVRATADŌRANĀŚAPRĀYAŚCITTAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 76*a* of the MS. described under No. 3055.

Complete.

Same as the above.

No. 8183. अनन्तव्रतपूजाविधानम्.
ANANTAVRATAPŪJĀVIDHĀNAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 110*a* of the MS. described under No. 8167.

Complete.

Deals only with that part of the Vrata which relates to the process of worshipping Ananta.

Beginning:

श्रीमदनन्ताय नमः—

नमो नारायणायेति मन्त्रमुच्चारयेत्ततः ।

* * * *

. . . . . ध्यात्वानन्तमथार्चयेत् ॥

आगच्छानन्त देवेश तेजोराशे जगत्पते ।

यावद्व्रतं समानीतं तावत्त्वं सन्निधौ भव ॥

End:

अनन्तः प्रतिगृह्णाति अनन्तो वै ददाति च ।

अनन्तस्तारकोभाभ्यामनन्ताय नमो नमः ॥

न्यूनातिरिक्तान्यपरिस्फुटानि यानीह कर्माणि मया कृतानि ।

कृत्स्नानि चैतानि मम क्षमस्व(प्रयाहि) तुष्टः पुनरागमाय ॥

Colophon:

इति श्रीमदनन्तपद्मनाभपूजाविधानं सम्पूर्णम् ॥

No. 8184. अनन्तव्रतोद्यापनकल्पः.
ANANTAVRATODYĀPANAKALPAḤ.

Pages, 29. Lines, 5 on a page.

Begins on fol. 70*b* of the MS. described under No. 3055, and not on 79*b* as shown therein.

Complete.

On the details connected with the completion ceremony of Vrata, which is generally carried out after an observance of fourteen years.

Beginning:

वैशाखे श्रावणे मासे प्रोष्ठपद्यां च कार्त्तिके ।
मार्गशीर्षेऽथ वा माघे शुक्लपक्षे चतुर्दशी ॥
व्रतस्योद्यापनं कुर्यात् कुर्यादुद्यापनं बुधः ।
शुक्लपक्षे त्रयोदश्यां चतुर्दश्यामथापि वा ॥

* * * *

वर्षे चतुर्दशे पूर्णे उद्यापनमथाचरेत् ।
मध्ये वोद्यापनं कुर्याद्यथावित्तानुसारतः ॥

End:

एतत्ते कथितं पार्थ व्रतानामुत्तमं व्रतम् ।
कृत्वा व्रतमिदं पुण्यं पापेभ्यो मुच्यते नरः ॥
ये तु शृण्वन्ति सततं ये पठन्ति नरोत्तमाः ।
सर्वपापविनिर्मुक्ता यास्यन्ति परमां गतिम् ॥

Colophon:

इति भविष्योत्तरपुराणे अनन्तव्रत(तोद्यापन)कल्पः सम्पूर्णः ॥

No. 8185. अनन्तव्रतोद्यापनकल्पः.

ANANTAVRATŌDYĀPANAKALPAH.

Pages, 9. Lines, 7 on a page.

Begins on fol. 83a of the MS. described under No. 3105.

Complete.

Similar to the above: as given in the Skandapurāṇa.

Beginning:

स्कन्द उवाच—

अनन्तव्रतमुद्दिश्य समग्रं परमेश्वर ।
उद्यापनविधिं शम्भो कथयस्व विधानतः ॥

ईश्वर उवाच—

वर्षे चतुर्दशे पूर्णे उद्यापनमथाचरेत् ।
मध्ये चोद्यापनं कार्यं यथावित्तानुसारतः ॥

End:

अनन्तपद्मनाभस्य कथाञ्च शृणुयाचतः ।
अनन्तस्य व्रतं सम्यग्व्रतकल्पं समाचरेत् ॥

Colophon:

इति श्रीस्कन्दपुराणे अनन्तव्रतोद्यापनविधिः समाप्तः ॥

No. 8186. अनन्तव्रतोद्यापनकल्पः.
ANANTAVRATŌDYĀPANAKALPAḤ.

Pages, 17. Lines, 8 on a page.

Begins on fol. 28*a* of the MS. described under No. 8177.
Complete.
See under the previous number for the Beginning.

End:

कुबेरेण पुरा चीर्णं मुनिभिस्सर्वदैवतैः ।
सगरेण दिलीपेन रघुणा भरतेन च ॥
अनुष्ठानवतां तेषां सर्वेषां भोगमोक्षदम् ।
. . . . व्रतस्योद्यापनं हि यः ॥
स मुक्त्वा सकलान् भोगान् अन्ते विष्णुपदं व्रजेत् ।

Colophon:

इति स्कान्दपुराणोक्तानन्तव्रतोद्यापनकल्पं सम्पूर्णम् ॥

No. 8187. अनन्तव्रतोद्यापनकल्पः.
ANANTAVRATŌDYĀPANAKALPAḤ.

Pages, 10. Lines, 4 on a page.

Begins on fol. 9*a* of the MS. described under No. 8178.
Complete.
Same as the above.

No. 8188. अनन्तव्रतोद्यापनकल्पः.

ANANTAVRATŌDYĀPANAKALPAḤ.

Substance, palm-leaf. Size, 11¾ × 1¼ inches. Pages, 22. Lines, 5 on a page. Character, Nandināgarī. Condition, slightly injured. Appearance, old.

Begins on fol. 17a. The other works herein are Baliharaṇaprakāra 1a, Mahānavamīdurgāpūjā 2a, Śamīpūjāvidhāna 4a, Daśaphalavrata 6a, Ṛṣipañcamīvratōdyāpana 12a, Ṛṣipañcamīvratōdyāpana 28a, Dānaphalavrata 35a, Śivarātrivrata 3·a, Grahārcanavidhi 44a, Kanyakādānasaṅkalpa 47b, Prājāpatyakṛcchrapratyāmnāya 51a.

Complete.

Same as the above.

No. 8189. अनन्तव्रतोद्यापनकल्पः.

ANANTAVRATŌDYĀPANAKALPAḤ.

Pages, 14. Lines, 5 on a page.

Begins on fol. 56a of the MS. described under No. 898, wherein this is given as Anantavratanaṣṭadōraprāyaścitta.

Complete.

Similar to the above.

Beginning:

युधिष्ठिर उवाच—

अनन्तव्रतमाहात्म्यमस्मिन् कृष्ण मया श्रुतम् ।
भगवान् देव(दोर)रूपेण ध्रुवं रक्षति मानवान् ॥

* * * *

पद्मशङ्खगदाचक्रलक्ष्मीगरुडशोभित ।
श्रीवत्सकौस्तुभोरस्क फणसप्ताञ्चित प्रभो ॥
व्रतस्योद्यापने मह्यं सर्वकामप्रदो भव ।

End:

यः करोति नृपश्रेष्ठ व्रतस्योद्यापनं मुदा ।
विष्णुलोकमवाप्नोति विष्णुलोके महीयते ॥

Colophon:

इति स्कान्दपुराणे उमामहेश्वरसंवादे अनन्तव्रतोद्यापनाङ्गं सम्पूर्णम् ॥

No. **8190.** अनन्तव्रतोद्यापनकल्पः.

ANANTAVRATŌDYĀPANAKALPAḤ.

Pages, 19. Lines, 7 on a page.

Begins on fol. 131*a* of the MS. described under No. 2763.

Complete.

Similar to the above.

Beginning:

एवङ्गुणतिथौ . . . . . . आचार्यब्रह्मस्वाम्यृत्विग्ब्राह्मणै-स्सह कलशस्थापनार्चनपुरस्सरं श्रीमदनन्तव्रतोद्यापनं करिष्ये । पुण्याहं कुर्यात् ।

श्रीमते विष्णुयज्ञार्थं मदर्थं त्वामहं वृणे—इति मन्त्रेण मया सङ्कल्पिते मदनन्तव्रतोद्यापनकर्मणि आचार्यं त्वामहं वृणे ।

End:

भगवान् सर्वात्मकस्सुप्रीतो वरदो भूत्वा अनन्तव्रतोद्यापनकल्पोक्त-सम्पूर्णसकलफलावाप्तिरस्त्विति भवन्तो ब्रुवन्तु ॥

Colophon:

श्रीअनन्तव्रतोद्यापनविधिस्समाप्तः ॥

No. **8191.** अनन्तव्रतोद्यापनकल्पः.

ANANTAVRATŌDYĀPANAKALPAḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 67*a* of the MS. described under No. 764, wherein this has been omitted to be shown among the other works.

Complete.

Similar to the above.

Beginning:

अनन्तव्रतमाख्यातं समग्रं परमेश्वर ।
उद्यापनञ्च कर्त(वक्त)व्यं सम्यग्व्रतफलं हि तत् ॥
गोचर्ममात्रं संलिप्य गोमयेन विचक्षणः ।
मण्डलं तत्र कुर्याद्वै सर्वतोभद्रसंज्ञकम् ॥

End:

आदौ मध्ये तथा चान्ते व्रतस्योद्यापनं भवेत् ।
सर्वपापविनिर्मुक्तो भुक्त्वा भोगान् मनोरथान् ।
पुत्रमित्रकलत्राद्यैर्विष्णुलोकं स गच्छति ॥

Colophon:

इति श्रीमदनन्तव्रतोद्यापनविधिस्सम्पूर्णः ॥

No. 8192. अनन्तव्रतोद्यापनकल्पः.
ANANTAVRATODYĀPANAKALPAḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 100a of the MS. described under No. 3472.
Complete: as given in the Bhaviṣyōttarapurāṇa.
Similar to the above.

Beginning:

अनन्तव्रतमाहात्म्यं कृष्ण त्वत्तो मया श्रुतम् ।
भगवान् दोररूपेण रक्षतीति च मानवान् ॥

* * * *

श्रीकृष्ण उवाच—

उद्यापनविधिं वक्ष्ये शृणुष्वैकमना नृप ।
तस्मिन् कृते प्रयत्नेन अनन्तः परितुष्यति ॥
उद्यापनं विना यस्य व्रतस्य न फलं भवेत् ।
तस्माद्यथा तथा कुर्यात् वित्तशाठ्यं विना नृप ॥

End :

एवं कृते नृपश्रेष्ठ कर्मण्यनु जनार्दनम् ॥
अनन्तरूपी भगवान् तृप्तो भवति सर्वदा ।
स तस्य फलमाप्नोति विष्णुलोके महीव्रते ॥

Colophon :

इति भविष्योत्तरपुराणे कृष्णयुधिष्ठिरसंवादे अनन्तोद्यापनविधिस्स-
माप्तः ॥

No. 8193. अनन्तव्रतोद्यापनकल्पः.

ANANTAVRATŌDYĀPANAKALPAḤ.

Pages, 8. Lines, 6 on a page.

Begins on fol. 17*a* of the MS. described under No. 8180.
Incomplete.
Similar to the above.

Beginning :

युधिष्ठिर उवाच—

देवदेव ममास्त्येव व्रतस्य परमाद्भुतम् ।
उद्यापनविधिं ब्रूहि अनुग्राह्योऽस्मि केशव ॥
विधिं विनोद्यापनेऽस्य न व्रतस्य फलं लभेत् ।
तस्माद्यथा तथा कुर्याद्वित्तशाठ्यविवर्जितः ॥

श्रीकृष्ण उवाच—

मासि भाद्रपदे प्राप्ते परिपूर्णे व्रते ततः ।
आदौ मध्ये तथा चान्ते व्रतस्योद्यापनं चरेत् ॥

End :

यद्वा पुरुषसूक्तेन मन्त्रैरेतैर्हुनेत्ततः ।
अनन्ताय स्वाहा, कामाय स्वाहा, श्रीलात्मने स्वा(हा) ॥

No. 8194. अभोज्यार्कव्रतम्.
ABHŌJYĀRKAVRATAM.

Pages, 7. Lines, 7 on a page.

Begins on fol. 23a of the MS. described under No. 5765.

Incomplete.

Deals with a Vrata intended to propitiate the sun-god. This is performed on Sundays which have to be observed for the purpose as fasting days.

Beginning:

एवंगुणविशेषणविशिष्टायां शुभतिथौ निरशनभानुवारव्रतोद्यापनाङ्ग-सकलफलावाप्त्यर्थं सूर्यनारायणमुद्दिश्य श्रीसूर्यनारायणप्रीत्यर्थं षोडशोपचारपूजां करिष्ये ।

आदित्याय नमस्तेऽस्तु नमस्ते सर्वमूर्तये ।
मूर्तिध्यानं करोमीश सर्वमङ्गलकारक ॥

End:

आचार्योक्तेन मार्गेण व्रतं कुर्यामनिन्दितः(।) ॥
वायनन्तु यथाशक्ति ब्राह्मणाय ददाति(मि) च ।
करोमि दोरबन्धं च नमस्कारं च भक्तितः ॥
इति तुष्टा तु शमना कन्यका पुनरब्रवीत् ।
निरशनभानुवारस्य व्रतस्योद्यापनङ्क्षम् ॥
स्त्रिय ऊचुः.

No. 8195. अमासोमवारव्रतकल्पः.
AMĀSŌMAVĀRAVRATAKALPAḤ.

Substance, palm-leaf. Size, 15¾ × 1¾ inches. Pages, 25. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 30a. The other works herein are Grahaṇaślōkaḥ 1a, Varalakṣmīvratakalpa 2a, Vināyakavratakalpa 7a, Jīvavāraikādaśīvratakalpa 13a, Gōpadmavratōdyāpana 19a, Sarasvatīpūjāvidhi 27a.

Complete: as given in the Bhaviṣyōttarapurāṇa.

On the Vrata to be observed when the new-moon-day falls on a Monday. The observance of this Vrata, consisting mainly of the worship of the Aśvattha tree, is considered to have the power of enabling one to reach the world of Viṣṇu, i.e., to obtain Mōkṣa.

Beginning :

एवंगुणविशेषणविशिष्टायां शुभतिथौ . . . . परत्र विष्णुलोकावाप्त्यर्थमश्वत्थनारायणमुद्दिश्य अश्वत्थनारायणप्रीत्यर्थमष्टोत्तरप्रदक्षिणाङ्गाश्वत्थनारायणपूजां करिष्ये । तदङ्गकलशपूजां कृत्वा गणपतिपूजां कृत्वा तदनन्तरमश्वत्थनारायणपूजां करिष्ये ।

व्यक्ताव्यक्तस्वरूपाय सृष्टिस्थित्यन्तकारिणे ।
आदिमध्यान्तहीनाय विष्णवे ते नमो नमः ॥

End :

त्रिलोकनाथ देवेश सर्वभूतदयानिधे ।
द्वादशापूपदानेन यथोक्तफलदो भव ॥
यस्य स्मृत्या च . . . . . ॥

अनया षोडशोपचारपूजया भगवान् सर्वात्मकः श्रीअश्वत्थनारायण सुप्रीतो वरदो भवतु ।

इति पूजाविधानं सम्पूर्णम् ॥

अनन्तरं कथाश्रवणेन अष्टोत्तरशतप्रदक्षिणं कुर्यात् ॥

Beginning of कथा--

श्रीसूतः—

शरतल्पगतं भीष्ममुपगम्य युधिष्ठिरः ।
कृतप्रणामो धर्मात्मा इदं वचनमब्रवीत् ॥
हतेषु कुरुमुख्येषु भीमसेनेन कोपिना ।
तथापरेषु सूतेषु हतेषु युधि जिष्णुना ॥

End :

स्नुषाभिः कारयामास तदा सोऽप्यश्वत्थेश्वरम् ।
भुक्त्वा भोगान् बहूंस्तत्र पुत्रपौत्रादिभिः सह ॥

सर्वे परिवृतास्ते च यान्ति विष्णोः परं पदम् ।
पुरुषश्रेष्ठसुशीलो यो नरो व्रतराजमिमन्तनुते(?) ।
निखिलं परिधूय पापराशिं नियतं विष्णुपदे निवासमेति ॥

Colophon:

इति श्रीभविष्योत्तरपुराणे भीष्मयुधिष्ठिरसंवादे अमावास्यासोमवार-व्रतकल्पं सम्पूर्णम् ॥

No. **8196.** अमासोमवारव्रतकल्पः.

AMĀSŌMAVĀRAVRATAKALPAḤ.

Substance, palm-leaf. Size, 14¾ × 1¼ inches. Pages, 13. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1a. The other works herein are Gōpadmavrata 8a, Gōpadmavratakalpa 13a, Mathanadvādaśivratōdyāpana 22a.

Wants beginning and end.

Same as the above.

No. **8197.** अमासोमवारव्रतकल्पः.

AMĀSŌMAVĀRAVRATAKALPAḤ.

Substance, palm-leaf. Size, 16½ × 1¾ inches. Pages 17. Lines, 5 on a page. Character, Telugu. Condition, fair. Appearance, old.

Begins on fol. 29a. The other works herein are Kēdāriśvaravratakalpa 1a, Vināyakavratakalpa 10a, Varalakṣmīvratakalpa 16a, Saṅkaṭacaturthīvrata 20a, Citraguptavrata 27a, Vināyakavrata 38a, Mathanadvādaśīvrata 42a, Rāmāṣṭōttaraśatanāmāvali 46a, Āndhragānaviṣaya 51a.

Complete.

Similar to the above.

Beginning:

अथैनं मुनयस्सर्वे शौनकाद्या द्विजोत्तमाः ।
सूतं पुराणवक्तारं महाभागवतोत्तमम् ॥

दृष्ट्वा प्राञ्जलयस्सर्वे प्रोचुर्व्रतपरायणाः ।

ऋषय ऊचुः—

सूत सर्वज्ञ धर्मात्मन् व्यासशिष्य महामते ॥

* * * *

अमावास्या तिथिर्विप्रास्सोमवारयुता भवेत् ।

तस्यां च पूजयेद्देवं तस्य पुण्यमनन्तकम् ॥

End:

गोघ्नश्च (यः) कृतघ्नश्च दरिद्रो व्याधिपीडितः ।

पापोपहतमर्त्यस्तु व्रतराजं समाचरेत् ॥

य इदं पुण्यमाख्यानं पठेद्वा शृणुयादपि ।

मुच्यते सर्वपापेभ्यो विष्णुसायुज्यमाप्नुयात् ॥

Colophon:

इति भविष्योत्तरपुराणे अमावास्यासोमवारव्रतकल्पं सम्पूर्णम् ॥

No. 8198. अमासोमवारव्रतकल्पः.

AMĀSŌMAVĀRAVRATAKALPAḤ.

Substance, palm-leaf. Size, 13½ × 1⅜ inches. Pages, 6. Lines, 12 on a page. Character, Grantha. Condition injured. Appearance, old.

Begins on fol. 1a. The other works herein are Nṛsiṁhapūjā 4a, Ēkādaśīvrata 5a, Tulasīvratapūjā 6a, Kṛṣṇajayantīvrata 6b, Dhāraṇapāraṇavrata 8a, Vināyakapūjā 8b, Vāmanajayantīvratapūjā 10a, Śarasvatīpūjā 11a, Balīndrapūjā 13a, Māsunaktapūjā 13a, Śivāṣṭōttarapūjā 14, Sōmavāravrata 14a, Śivarātripūjā 76b, Śanitrayōdaśīvrata 18b, Dāyabhāgaviṣaya 22a, Yamunāpūjā 29a.

Incomplete

Same subject as in the above

Beginning:

मम परमेश्वरप्रीत्यर्थं अमासोमवारे अश्वत्थपूजां प्रदक्षिणञ्च करिष्ये । कुसुमाक्षतान् गृहीत्वा.

अश्वत्थ सर्वपापानि शतजन्मार्जितानि च ।
दद(ह)स्व त्वं वृक्षराज सर्वैश्वर्ययुतो(प्रदो)भव ॥ इति ध्यानम् ।
वृन्दारकैस्सदा सेव्यं शङ्खचक्रगदाधरम् ।
आवाहयामि वृक्षेन्द्र त्वयि नारायणं विभुम् ॥ आवाहनम् ।

End:

मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे ।
अग्रतश्शिवरूपाय वृक्षराजाय ते नमः ॥ नमस्कारः ॥

No. 8199. अमासोमवारव्रतोद्यापनम्.
AMĀSOMAVĀRAVRATŌDYĀPANAM.

Substance, palm-leaf. Size, 13¾ × 1¼ inches. Pages, 5 Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 6a. The other works herein are Sōmavāraśivāṣṭōttaraśata 1a, Sōmavāravratōdyāpanaprayōga 1b, Rāmanavamīvrata 8a, Kṛṣṇāṣṭōttaraśatanāmāvali 9a, Rāmāṣṭōttaraśatanāmāvali 10b, Sarasvatīkalpa 11a.

Complete: as given in the Bhaviṣyōttarapurāṇa.

On the rites connected with the completion of the Amāsōmavāravrata, the observance of which is said to confer on one the blessing of having long-lived children.

Beginning:

श्रीभीष्म उवाच—

शृणु राजन् प्रवक्ष्यामि उद्यापनविधिक्रमम् ।
कृतेन येन भूयस्ते सन्ततिश्चिरजीविनी ॥
अमावास्या यदा पार्थ सोमवारेण संयुता ।
गृहे वाश्वत्थमूले वा उ(द्या)पनविधिं शुभम् ॥
सम्यक् शुद्धिं प्रकुर्वीत गोमयेनोपलिप्य ते (च) ।
रङ्गवल्ल्यादिकं कृत्वा पद्मकिञ्जल्ककेसरैः ॥

End:

व्रतराजमिद(मं) करोतु नारी क्रियमाणं यदि वा विलोकयेत्सा ।
अखिलन्त्वपहाय पापराशिं नियता विष्णुपदं निवासमेति ॥

Colophon:

इति भविष्योत्तरपुराणे भीष्मयुधिष्ठिरसंवादे अमासोमवारविधि समाप्तः ॥

No. 8200. अमासोमवारव्रतोद्यापनम् .

AMĀSŌMAVĀRAVRATŌDYĀPANAM.

Substance, palm-leaf. Size, 19⅝ × 1⅜ inches. Pages, 4. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 24*a*. The other works herein are Adhyāyōtsarjana 1*a*, Gaṇahōma 1*a*, Grahapravēśaprayōga 9*a*, Kūśmāṇḍahōma 11*a*, Vidhurāgnisandhāna 15*a*, Anugatāgnisandhāna 15*b*, Agnihōtrasthālīpāka 16*b*, Āgrayaṇasthālīpāka 17*b*, Bālanārāyaṇabali 19*a*, Arkavivāha 20*a*, Kadalīvivāha 21*a*, Grahaṇaśānti 22*a*, Saṅkramaśānti 26*a*, Śyēnaśānti 28*a*, Samāvartana 29*a*, Vivāhāgnyanugatiprāyaścitta 36*a*, Ṛtuśānti 37*a*, Sahasrabhōjanavidhi 38*b*, Āturasannyāsavidhi 40*a*, Yatisaṁskāravidhi 44*b*, Yatipārvaṇaśrāddha 47*b*, Bhikṣunārāyaṇabali 48*b*, Kuhūśānti 52*a*, Dhaniṣṭhāśānti 54*b*, Āyuṣyahōma 58*b*, Sōmavāravratōdyāpana 61*a*, Pradōṣavratōdyāpana 67*a*, Nalavēṣṭanaśānti 73*a*.

Complete. From the Viṣṇupurāṇa.

Similar to the above.

Beginning:

अतः परं प्रवक्ष्यामि उद्यापनविधानतः ।
अमायुक्ते सोमवारे सम्पूर्णतिथिवासरे ॥
त्रिवर्षानन्तरं कार्यमुद्यापनंसम(नमथा):चरेत् ।
त्रिमूर्तिरूपाश्वत्थस्य दर्शनं पापनाशनम् ॥

अष्टोत्तरशतैः पुष्पैर्या नारी प्रदक्षिणन्तथा ।
सप्तजन्मकृतं पापं तत्क्षणेन विनश्यति ॥

End :

दमयन्त्या नलप्राप्त्यै कृतं व्रतमिदं शुभम् ।
ये पठन्ति तमाख्यानं शृण्वन्ति श्रद्धयान्विताः ॥
ते सर्वे पापनिर्मुक्ता यान्ति चैव शुभाङ्गतिम् ।
ये कुर्वन्ति नरास्सम्यक् प्राप्नुवन्त्यखिलं शुभम् ॥

Colophon :

विष्णुपुराणे कृष्णरुक्मिणीसंवादे अश्वत्थप्रदक्षिणमहिमानुवर्णनं नाम एकादशोऽध्यायः — इत्याह भगवान् बोधायनः ॥

No. 8201. अमुक्ताभरणसप्तमीव्रतकथा.

AMUKTĀBHARAṆASAPTAMĪVRATAKATHĀ.

Pages, 7. Lines, 4 on a page.

Begins on fol. 39*b* of the MS. described under No. 3055, wherein this has been omitted to be shown among the other works.

Complete.

A Purāṇic tale illustrating the importance of the Vrata. This Vrata consists in the worship of Śiva and Pārvatī and is generally observed on the seventh day of the dark and bright fortnights. The most important of the details connected with it is the tying round the arm of a gold ornamental band which should never be removed. The observance of this Vrata is considered to have the power of removing barrenness in women. This is usually observed for a period of 12 years.

Begininng :

यद्वाप्यमुक्ताभरणसप्तमीव्रतमुत्तमम् ।
कुर्याद्वन्ध्यात्वनाशाय भविष्योत्तरभाषितम् ॥

श्रीकृष्ण उवाच—

रोमशो नाम ब्रह्मर्षिः मधुरामागतः पुरा ।
सोऽर्चितो वासुदेवेन देवक्या च युधिष्ठिर ॥

उपविष्टः कथां पुण्यां कथयित्वा मनोरमाम् ।
ततः कथान्तं भूयः कथामेतां प्रचक्रमे ॥

End:

यत्कुकुटीव्रतपरं कवर्गसमेतं चक्रे सुरासुरगुरुं हृदये निधाय ।
तथा करोति कलुषौघनिघातदक्षं सा श्रीयुतः भवति (शीलवती) सुवत्सा ॥

Colophon:

इति भविष्योत्तरपुराणे वन्ध्यात्वहरणामुक्ताभरणसप्तमीव्रतकल्पं सम्पूर्णम् ॥

No. 8202. अमुक्ताभरणसप्तमीव्रतकल्पः.

AMUKTĀBHARAṆASAPTAMĪVRATAKALPAḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 36a of the MS. described under No. 5765, wherein this has been omitted to be shown among the other works.

Complete.

Gives the details of procedure for observing the Vrata explained under the last number.

See under the previous number for the Beginning.

End:

ईश्वर उवाच—

अर्थ(र्धि) तव प्रदास्यामि सत्यधर्मस्य सुव्रते ।
सुखीभव प्रसादेन पुत्रं च जनयिष्यसि
इत्येवं कथयित्वा तु तामाशु मुनिपुङ्गव ।
जगाम नभसा पार्थ माभूच्छूलितटोदितम् ॥
कुकवाकुप्लवङ्गाख्यं देवकथाचरितं व्रतम् ।
तेषां सन्ततिविच्छेदो न कदाचिद्भविष्यति ॥
स्त्रियश्च याश्चरिष्यन्ति व्रतमेतत्सुशोभनम् ।
यद्व्रतं पठत नित्यं यास्यन्ति शिवमन्दिरम् ॥

Colophon:

इति वन्ध्यात्वहरामुक्ताभरणसप्तमीव्रतकल्पं सम्पूर्णम् ॥

No. 8203. अमुक्ताभरणसप्तमीव्रतकल्पः.

AMUKTĀBHARAṆASAPTAMĪVRATAKALPAḤ.

Pages, 9. Lines, 4 on a page.

Begins on fol. 30a of the MS. described under No. 3055.

Complete.

Similar to the above.

Beginning:

एवंगुणविशेषणविशिष्टायां पुण्यतिथौ मम सदा कुटुम्बस्य क्षेम-स्थिरायुरारोग्यैश्वर्याभिवृद्ध्यर्थं वन्ध्यादोषनिवृत्त्यर्थं श्रीभवानीशङ्करमुद्दिश्य श्रीभवानीशङ्करप्रीत्यर्थं काकवन्ध्याकदलीवन्ध्यामृतवन्ध्यादोषपरिहारार्थ-ममुक्ताभरणसप्तमीव्रतं करिष्ये—

अनेकसूर्यसंकाशमनेकशशिशीतलम् ।
अष्टमूर्तिमुदाराङ्गं लसद्गङ्गाजटाधरम् ॥

End:

संवत्सरकृतां पूजां संप्राप्य विधिवन्मम ।
व्रते दाने धनन्तत्वं कृत्वा गच्छ यथेच्छया ॥
मन्त्रहीनं . . . . तदस्तु मे ॥
यस्य स्मृत्या च नामोक्त्या तपःपूजाक्रियादिषु ।
न्यूनं संपूर्णतामेति सद्यो वन्दे तमच्युतम् ॥

Colophon:

इति अमुक्ताभरणसप्तमीव्रतदेवोमामहेश्वरपूजाविधानं संपूर्णम् ॥

No. 8204. अमुक्ताभरणसप्तमीव्रतकल्पः.

AMUKTĀBHARAṆASAPTAMĪVRATAKALPAḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 34a of the MS. described under No. 5765.

Complete.

Similar to the above.

Beginning:

एवंगुणविशेषणविशिष्टायां शुभतिथौ इह जन्मनि जन्मान्तरेषु मनोवाक्कायकर्मभिः ज्ञानाज्ञानकृतदोषपरिहारार्थं श्रीभवानीशङ्करमुद्दिश्य

भवानीशङ्करप्रीत्यर्थममुक्ताभरणसप्तमीव्रतं करिष्ये । तदङ्गं कलशपूजां कुर्यात् । पूर्वं पुण्याहवाचनं कुर्यात् ।

कृत्वा शुभं शान्तमूर्तिलिङ्गाकारं सुरेश्वरम् ।
वामे गौरीं न्यसेद्देवं सर्वालङ्कारसंयुतम् ॥
पुरतो नन्दिनं न्यस्तं ध्यायेच्छम्भुमुमापतिम् ।
सुरासुरैर्वन्द्यमानं व्याघ्रचर्मोत्तरीयकम् ॥

End:

व्रतेनानेन सुप्रीतो भगवान् पार्वतीप्रियः ॥
ददात्विष्टान् फलान् भोगानसमानपरिच्छदान् ।
तथापि तारच सरं(?) मम भक्तिश्च शाश्वतम् ॥

प्रार्थनम्—

मन्त्रहीनं क्रियाहीनं भक्तिहीनं महेश्वर ।
यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥

Colophon:

पूजाविधानं सम्पूर्णम् ॥

No. 8205. अमुक्ताभरणसप्तमीव्रतोद्यापनविधिः
AMUKTĀBHARAṆASAPTAMĪVRATŌDYĀPANA-VIDHIḤ

Pages, 2. Lines, 4 on a page.
Begins on fol. 4a of the MS. described under No. 8055.
Complete.
On the manner of completing the above-mentioned Vrata.

Beginning:

एवं द्वादशवर्षाणि प्रतिवर्षं प्रपूजयेत् ।
आदौ मध्ये तथान्ते कुर्यादुद्यापनं बुधः ॥
स्नात्वा सन्ध्यां च पूर्वेद्युः . . . . ।
ततो गृहमनुप्राप्य पुण्याहं वाचयेत्ततः ॥

आचार्यं वरयेत्वश्चादृत्विजो द्वादश क्रमात् ।
कर्षमात्रसुवर्णेन तदर्धार्धेन वा पुनः ॥
यथाविभवसारेण वित्तशाठ्यं न कारयेत् ।

End:

स्त्रियश्च याश्चरिष्यन्ति व्रतमेतदतन्द्रिताः ।
मर्त्यभावे सुखी स्थित्वा यास्यन्ति परमाङ्गतिम् * ॥

Colophon:

इति भविष्योत्तरपुराणे अमुक्ताभरणसप्तमीव्रतोद्यापनं सम्पूर्णम् ॥

No. 8206. अरुन्धतीव्रतकल्पः.
ARUNDHATĪVRATAKALPAḤ.

Pages, 5. Lines, 4 on a page.

Begins on fol. 7*a* of the MS. described under No. 3055.

Complete.

This Vrata consisting of the worship of four Brahmin couples is to be observed during the Vasantartu, which season generally extends from the beginning of April to the middle of June. This observance is considered to have the power of bestowing long life on one's husband.

Beginning:

अरुन्धतीव्रतं वक्ष्ये सदा सौभाग्यकारकम् ।
येन चीर्णेन सम्यक्(च) नारी सौभाग्यभाग्भवेत् ॥
वसन्तर्तु समासाद्य नारी चोपोषिता सती ।
मिथुनानि च चत्वारि समाहूय यतेन्द्रिया ॥
पूजयेत्स्वर्णताम्बूलाभ्यपुष्पाक्षतैरशुभैः ।

End:

उपनीता पुनर्यानि सती साध्वी पतिव्रता ।
भर्तृयुक्ता सर्वकालं क्रियते नात्र संशयः ।

---

* शिवमन्दिरम्—इति पाठान्तरम्.

पतिव्रता भवेत्साध्वी यथा देवी त्वरुन्धती ।
पुत्रभर्तृमती भूत्वा भोगान् भुङ्क्ते कृते व्रते ॥

Colophon :

इति श्रीमत्स्कन्दपुराणे स्कन्दनारदसंवादे अरुन्धतीकल्पं संपूर्णम् ॥

No. 8207. अर्धोदयकल्पः.
ARDHODAYAKALPAH.

Pages, 6. Lines, 5 on a page.

Begins on fol. 62*a* of the MS described under No. 3055.

Complete.

Deals with the Vrata to be observed on the Ardhōdaya day, i.e., on that day of the Māgha or Pauṣa month, when, the new moon, Vyatīpata, Sunday and Śravana come together. This Vrata is considered to be efficacious in removing one's sins. Bathing in holy waters, giving offerings to the manes of ancestors, etc., are the chief things to be observed in this Vrata.

Beginning :

स्कन्दः—

देवदेव महादेव ब्रूहि मेऽर्थवतां वर ।
पापक्षयकरं नृणां भक्तोतो(वेत्कि वा)कलौ शिवा(व) ॥
प्रायशो दुःखिता मर्त्याः प्राकृतैः पापसञ्चयैः ।
कथञ्च सुखितैस्तैस्तु(नस्ते स्युः) चिन्तेयं महती मह्(म) ॥
यदि कश्चिदुपायोऽस्ति तन्मे ब्रूहि सुनिश्चितम् ।

* *

माघादीन्दुक्षये पाते वारेऽर्के श्रवणं यदि ।
अर्धोदयस्स विज्ञेयस्सहस्रार्कग्रहेस्समः ॥
पौषेऽमाप्रतिपत्पातश्रवणार्कान्विता दिवा ।
असावर्धोदयो योगः कोट्यर्कग्रहसन्निभः ॥

End:

भवेच्चार्धोदये दत्वा पिण्डदानं च तर्पणम् ।
गयायाश्चैव यत्पुण्यं तत्पुण्यं लभते नरः ॥
एकेन स कुले तस्मिन् उत्तारयित्वा स्वकर्मभिः ।
ते स्वर्गं यान्ति गाङ्गेय तत्रोद्दिश्य प्रदानरः ॥
गङ्गासागरयोस्सङ्गे गङ्गायमुनयोस्तथा ।
देवनद्यां गयायां च प्रभासे पुष्पिते तथा ॥
एतत्ते कथितं सर्वं पुण्यात्पुण्यतरं परम् ।
श्रुतं पापहरं नृणां यः पठेच्छ्रोतुमिच्छति ॥

Colophon:

इति श्रीपाद्मपुराणे अर्धोदयकल्पं सम्पूर्णम् ॥

No. 8203. अश्वत्थविवाहकल्पः.

AŚVATTHAVIVĀHAKALPAḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 111a of the MS. described under **No. 2763 and** not on fol. 110a as shown therein.

Complete.

On the Vrata which consists chiefly in the performance of marital rites in relation to an Aśvattha tree. The performance of these rites is supposed to bestow upon one the benefits of all kinds of virtuous acts.

Beginning:

ऋषय ऊचुः—

ऋषयो देवतास्सर्वे नैमिशारण्यवासिनः ।
कृष्णं दृष्ट्वा महात्मानमूचुर्धर्ममनुत्तमम् ॥
यस्यानुष्ठानमात्रेण सर्वधर्माः कृताः खलु ।
तं धर्मं वद कृष्ण त्वं सर्वपापहरं शुभम् ॥

* * * *

पुरा कृतयुगे राजा कश्चिद्राजेन्द्रवर्धनः ।
बभूव तस्य वै भार्या धर्मशीला च नामतः ॥
अश्वत्थस्य महाराजो विवाहमकरोच्च सः ।
जनकाद्यास्तथा कुर्युर्दिव्यं धर्ममनुत्तमम् ॥

End:

ऋषयः—

साधूक्तं देवदेवेश सर्वपापप्रणाशनम् ।
करिष्यामो वयं चैवेत्युक्त्वा तत्र वनं ययुः ॥

Colophon:

इति भविष्योत्तरपुराणे सर्वदेवसम्मते श्रीकृष्णप्रोक्ताश्वत्थविवाहकल्प सम्पूर्णम् ॥

No. 8209. अश्वत्थविवाहविधिः.

ĀŚVATTHAVIVĀHAVIDHIḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 45*a* of the MS. described under No. 3237.

Complete.

Similar to the above.

Beginning:

अथाश्वत्थविवाहविधिरुच्यते—

ऋषय ऊचुः—

ऋषयो देवतास्सर्वे नैमिशारण्यवासिनः ।
यस्यानुष्ठानमात्रेण सर्वधर्माः कृताः खलु ॥

* * *

अश्वत्थस्य महाराजो विवाहमकरोच्च सः ।
जनको यस्तथा कुर्यात् धर्मार्थिक्यसुखप्रदम् ॥

End:

सर्वदेवमयो यस्मात् अश्वत्थ ऋषिभिः स्मृतः ।
तस्माद्विवाहं कर्तव्यं प्रवदन्ति मनीषिणः ॥
कोटिविप्रविवाहेन यत्फलं लभते भुवि ।

एवं श्रुत्वा धर्मराज कर्तव्यं नैव शेषयेत् ॥
विवाहं पिप्पलस्यापि कृत्वा मोक्षमवाप सः ।

Colophon:

इति हेमाद्रावश्वत्थविवाहविधिः ॥

No. 8210. अश्वत्थव्रतम्.
ASVATTHAVRATAM.

Pages, 8. Lines, 4 on a page.

Begins on fol. 197*a* of the MS. described under No. 2087. As however fol. 197 is partly broken, the extract below is from page 198.

Complete.

On the Vrata consisting in the worship of the **Asvattha tree.** The observance of this Vrata is considered to have the power of removing from one various kinds of dire diseases.

Beginning:

क्षयापस्मारकुष्ठादिप्रमेहैर्विविधैर्ज्वरैः ।
उदरे मूत्रकृच्छ्रे तु राहुग्रस्ते तथैव च ॥
अन्येष्वनुक्तरोगेषु व्रणरोगे तथैव च ।
एतेषां रोगनाशाय कुर्यादश्वत्थसेवनम् ॥
प्रातरुत्थाय नद्यादौ स्नात्वाचम्य कृतक्रियः ।
अश्वत्थमूलमाश्रित्य गोमयेनोपलिप्य च ॥

End:

क्षयापस्मारकुष्ठादिसर्वरोगैः प्रमुच्यते ॥
मृतस्य शत्रुपीडा च यमराजभयं तथा ।
इह(वा)जन्म(न)नेऽन्यस्मिन् सर्वपापैः प्रमुच्यते ॥

Colophon:

इत्याथर्वणशाखायामश्वत्थकल्पं सम्पूर्णम् ॥

No. 8211. अश्वत्थव्रतकल्पः.

AŚVATTHAVRATAKALPAḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 38b of the MS. described under No. 3237.

Complete.

Similar to the above. The Vrata is said to be efficacious in removing barrenness from women and in extricating one from dangers.

Beginning:

अथाश्वत्थव्रतविधिरुच्यते—

भगवन् सर्वधर्मज्ञ सर्वशास्त्रविशारद ।
स्त्रीणां पुत्रविहीनानां नराणां विविधापदाम् ॥
केनोपायेन मे ब्रूहि सुखसिद्धिः कथं भवेत् ।

* * * *

श्रीकृष्ण उवाच—

अहमश्वत्थरूपेण संभवामि च भूतले ।
तस्मात्सर्वप्रयत्नेन कुरुध्वं तरुसेवनम् ॥
तेन सर्वाणि भद्राणि भविष्यन्ति न संशयः ।
विष्णुर्वदुक्तवान् तेभ्यस्तद्व्रतन्ते वदाम्यहम् ॥

End:

यं यं कामयते कामं तं तमाप्नोत्यसंशयः ।
इहैव भोगान् भुक्त्वा तु विष्णोः सायुज्यमाप्नुयात् ॥

Colophon:

इत्यद्भुतसागरे अथर्वशाख्या(खाया)मश्वत्थप्रदक्षिणकल्पस्समाप्तः ॥

No. 8212. अश्वत्थोपनयनविधिः.
AŚVATTHOPANAYANAVIDHIḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 43*a* of the MS. described under No. 3237.

Complete, as laid down by Śaunaka in the Brahmāṇḍapurāṇa.

Deals with the Vrata which consists in investing the Aśvattha tree with the sacred thread in the course of the eighth or eleventh year after it has been planted. The observance of the Vrata is considered to have the power of bestowing on one long life and prosperity, and of leading one to the attainment of salvation.

Beginning:

अश्वत्थोपनयनविधिरुच्यते—

शौनकोऽहं प्रवक्ष्यामि अश्वत्थस्योपनायनम् ।
स्थापनादष्टमे वर्षे वयस्येकादशेऽपि वा ॥
उक्तः कल्पस्तथा सद्भिः कुर्यात्तस्योपनायनम् ।
तत्रोत्तरायणे श्रेष्ठे गुरुशुक्रप्रकाशिते ॥

End:

अन्येभ्यो दक्षिणां दद्यात्स्ववित्तस्यानुसारतः ।
ब्राह्मणान् भोजयेदष्टौ भुञ्जीयाद्बन्धुभिः सह ॥
एवं यः कुरुते तस्य वर्धमाने धनायुषी ।
कुलकोटिं समुद्धृत्य विष्णोः सायुज्यमाप्नुयात् ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे अश्वत्थोपनयनविधिः ॥

No. 8213. अश्वत्थोपनयनविधिः.
AŚVATTHOPANAYANAVIDHIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 80*a* of the MS. described under No. 2840

Complete.

Similar to the above.

Beginning:

पिप्पलस्योपनयनं भगवान् शौनकोऽब्रवीत् ।
. . . . दम्पत्योरुक्तकाले सुलग्नके ॥
वृद्धिश्राद्धं पूर्वदिने कौतुकं ग्रहपूजनम् ।
अङ्कुरार्पणपूर्वं तु पुण्याहं वाचयेदथ ॥

End:

धनधान्यसमृद्धिः स्याद्विष्णुसायुज्यमाप्नुयात् ।
. . . . . . रेन्नित्यं कर्म पूर्वापरेऽपि च ॥

Colophon:

इति शौनकीये अश्वत्थोपनयनविधिः ॥

No. 8214. अश्वत्थोपनयनविवाहविधिः.
ASVATTHOPANAYANAVIVĀHAVIDHIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 17*a* of the MS. described under No. 1202.
Complete.

Deals with the Vrata which consists in investing the Aśvattha tree with the sacred thread and then performing its marriage, one half of the tree being considered to represent the bride and the other half the bridegroom.

Beginning:

अश्वत्थस्येशानदिग्भागे पुण्याहवाचनमभ्युदयं पञ्चामृतस्नानं तत्तन्मन्त्रैरश्वत्थपूजा, अग्निप्रतिष्ठापनं, वस्त्रयज्ञोपवीतमौञ्ज्यजिनधारणं तत्तन्मन्त्रैः कुर्यात् । अश्वत्थे वो निषदनमित्यृचा गन्धाक्षतादिभिस्तं पूजयेत् ।

End:

एकं पुम्भागमेकं स्त्रीभागमिति मनसा ध्यात्वा गन्धाक्षतपुष्पैरलङ्कृत्य माङ्गल्यधारणं, ततः विवाहं स्वगृह्योक्तविधानेन, यजा इत्यनुवाकं

चत्वारो ब्राह्मणा जपेयुः । . . . .
अभ्युदयं पुण्याहं च कुर्याद्ब्राह्मणान् भोजयेत् ॥

No. 8215. अष्टमीचतुर्दशीव्रतम्.

ASTAMĪCATURDAŚĪVRATAM.

Pages, 3. Lines, 4 on a page.

Begins on fol. 45*a* of the MS. described under No. 3055, wherein this has been omitted to be shown among the other works.

Complete; forms a portion of Bhaviṣyōttarapurāṇa.

On the Vrata, which consists in worshipping Śiva and in fasting at nights on the 8th and the 14th days in the bright and dark fortnights in every month, the Vrata being made to commence on the fourteenth day of the dark fortnight in any month.

The observance of this Vrata is considered to have the power of leading one to the attainment of salvation.

Beginning:

अथ नक्तोपवासस्य विधानं शृणु पाण्डव ।
येन विज्ञातमात्रेण नरो मोक्षमवाप्नुयात् ॥
येषु केषु च मासेषु कृष्णपक्षे चतुर्दशी ।
ब्राह्मणान् भोजयित्वा तु प्रारब्धेषु तथा प्रति ॥
द्वे अष्टमीचतुर्दश्यौ मासि मासि प्रकीर्तितौ(ते) ।
शिवार्चनपरो भूत्वा पूजितस्तु यथाविधि ॥

End:

पृष्ठतः स्वर्गगामिनां कलेवरसमन्वितः ।
दिव्यं(यद्)विमानमारुह्य सुखेनैव सुरालयम् ॥

Colophon:

इति भविष्योत्तरपुराणे अष्टमीचतुर्दशीव्रतकल्पं सम्पूर्णम् ॥

No. 8216. आरामप्रतिष्ठाकल्पः.

ĀRĀMAPRATIṢṬHĀKALPAḤ.

Pages, 13. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 5763, wherein this has been shown as Vanapratiṣṭhākrama.

On the manner of consecrating a garden.

Almost complete.

Beginning:

अथारामप्रतिष्ठाकल्पविधिं व्याख्यास्यामः—

उदगयनापूर्यमाणपक्षे माघादिपञ्चमासे कार्तिकद्वितीये कर्तव्यम् । चन्द्र-सिते पक्षे कृष्णपूर्वार्धे वा गुरुशुक्रयोर्बालवृद्धयोर्मूढवर्जिते पञ्चाङ्गशुद्धे शुभदिने स्थिरनक्षत्रे शुभयोगे चन्द्रताराबलसमन्विते आरामप्रतिष्ठादिपूर्वं दिवसे प्रातरुत्थाय दन्तधावनं कृत्वा प्रातस्सन्ध्यादिनित्यकर्मविधिं कृत्वा . . . . प्रतिष्ठादिने वृक्षस्य समीपे पूर्वं ईशान्यभागे वा द्वादश दशचतुर्हस्तमात्रं वा वेदिकां कारयेत् ।

End:

इन्द्रं वो विश्वतस्परि हे इन्द्र अत्रागच्छ सपरिवारेभ्यो भूतेभ्य इमं बलिं ददामि सर्वेभ्यो भूतेभ्यः बलिं भक्षय मां रक्ष दिशो रक्ष आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता अस्माकमभ्युदयं कुरु । एवमेवान्यत्र दिक्षु वनस्पते शतवल्शो विरोह ॥

शशाङ्कतोयेशकराद्यमित्रध्रुवाम्बुपुष्ये वसुदैवतेषु ।
उद्यानवाप्यादितटाककूपकार्याणि सिध्यन्ति जलोद्धृतन्तत् ॥

No. 8217. आर्द्राष्टमीव्रतकल्पः.
ĀRDRĀṢṬAMĪVRATAKALPAḤ.

Pages, 4. Lines, 4 on a page.

Begins on fol. 43*a* of the MS. described under No. 3055.

Complete, as found in the Skandapurāṇa.

Deals with the Vrata to be observed on the eighth lunar day in the dark fortnight of the month of Bhādrapada when the asterism Ārdrā is in the ascendant. The observance of this Vrata is supposed to have the power of bestowing on one wealth, fame, beauty and prosperity.

Beginning :

नमो गौर्यै स्कन्दमात्रे विश्वमूर्त्यै नमो नमः ।
त्वं गृहाण विरूपाक्ष रूपार्थेऽभ्यर्थितो मया ॥
* * * *
नमस्ये बहुलाष्टम्यां यदार्द्रा जायते तदा ।
व्रतमेतच्च दातव्यमुमामहेश्वरं विभुम् ॥
आरोग्यैश्वर्यसौभाग्यरूपसम्पत्प्रदायकम् ।

End :

त्रिनेत्रश्च महाभागस्सर्वाभरणभूषितः ।
तन्मन्त्रैः पूज्य विधिवत् पूजयेच्छङ्करं प्रति ॥

Colophon :

इति स्कन्दपुराणे आर्द्राष्टमीव्रतकल्पं सम्पूर्णम् ॥

No. 8218. उत्पलगौरीव्रतकल्पः.

UTPALAGAURĪVRATAKALPAḤ.

Substance, palm-leaf. Size, 16 × 1¼ inches. Pages, 5. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Incomplete.

Begins on fol. 3*b*. The other works herein are Śravaṇadvādaśīvratakalpa 1*a*, Putrānantavratakalpa 6*a*, Putrasaṅkrāntivratakalpa 8*a*, Bālādityavratakalpa 8*b*, Putragaṇapativratakalpa 10*a*.

This Vrata consists in worshipping Pārvatī on the day corresponding to that on which she is said to have come into existence again after having burnt up her body in a sacrificial ceremony performed by Dakṣa. Pārvatī is here considered to possess a body having the fragrance of the Utpala flower. Hence the name Utpalagaurī.

Beginning :

पुराभून्नर्मदातीरे प्रयागाख्या महापुरी ।
चकार चतुरास्योऽपि यत्र यागाननेकधा ॥

तत्र विप्राग्रणीरासीद्गौतमाख्यो महातपाः ।
आत्मानुरूपौ तस्यास्तां सुतौ श्रीपतिगोपती ॥
स कदाचिद् द्विजश्रेष्ठः कृतकृत्यः कृत कृतं (क्रमः) ।
ध्यात्वोत्पलाङ्ग्याः पार्वत्याः प्रादुर्भावं व्यलोकयत् ॥
ततस्सुतौ समाहूय स धर्मात्मेदमब्रवीत् ।
शृणुतां पुत्रकौ पूर्वं दक्षकन्या सती सती ॥
तनुं तत्याज केनापि कारणेन शिवप्रिया ।

* * * * *

अथार्के फल्गुनी पूर्वां त्यक्त्वार्यमभमागते ।
उदभूदुत्पलामोदसौकुमार्यवती शिवा ॥

* * * *

दिनन्तदद्य संप्राप्तमुत्पलाङ्गीव्रतं युवाम् ।
कुरुतां पुत्रकौ सम्यक् सर्वकार्यार्थसिद्धये ॥

End :

अन्येद्युः प्रातरेवाथ व्रतभङ्गभयादसौ ।
पुष्करिण्यां पपाताथ कन्या मदनमञ्जरी ॥
तामालोक्य द्विजः कश्चित्समुद्धृत्य ततस्सुधीः ।
पित्रोस्समर्पयामास निवेद्य कृतमात्मनः ॥
सुतां निर्भर्त्सितौ भीतौ तोषयित्वा द्विजोत्तमम् ।
पुनर्व्रतङ्कारयित्वा तस्या दोरं बबन्धतुः ॥
सहशाचारशीलां च.

No. **8219.** उमामहेश्वरव्रतकल्पः.

UMĀMAHEŚVARAVRATAKALPAḤ.

Substance, palm-leaf. Size, 17⅜ × 1⅜ inches. Pages, 33. Lines, 5 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete : forms the 56th Adhyāya of the Brahmāṇḍa-purāṇa.

Begins on fol. 1a. The other work herein is Kāmyavṛṣōtsarjanavidhi 18a.

This Vrata consists in the worship of Pārvatī and Paramēśvara on the full-moon day in the month of Bhādrapada. The observance of this Vrata is considered to have the power of bestowing on one all desired prosperity and of leading one to the attainment of salvation after death.

Beginning:

उमामहेश्वरं नाम व्रतं सर्वफलप्रदम् ।
कर्तुं मम द्विजश्रेष्ठा अनुज्ञां कुरुत शुभाम् ॥
विघ्नेश्वरपूजां कृत्वा सङ्कल्प्य पूर्वोक्तैवङ्गुण . . . . .
स्कान्दपुराणोक्तोमामहेश्वरव्रतं करिष्ये । . . . . .
देवदेव महादेव सर्वसौभाग्यवर्धनम् ।
करिष्ये त्वद्व्रतं देव प्रसादं कुरु मे प्रभो ॥

End:

इह लोके तु विपुलान् भोगभोग्यान् यथेप्सितान् ।
तथैव स्वस्य देहान्ते प्रयाति परमां गतिम् ॥

Colophon:

इति ब्रह्माण्डपुराणे मार्कण्डेयसंवादे (उमामहेश्वरव्रतं) नाम षट्त्रिंशोऽध्यायः ॥

No. 8220. उमामहेश्वरव्रतकल्पः.

UMĀMAHEŚVARAVRATAKALPAḤ.

Pages, 9. Lines, 8 on a page.

Begins on fol. 14b of the MS. described under No. 5852.

Complete as found in the Brahmavaivartapurāṇa.

Similar to the above.

Beginning:

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ श्रीउमामहेश्वरमुद्दिश्य उमामहेश्वरप्रीत्यर्थमुमामहेश्वरव्रतोद्यापनङ्करिष्ये, तदङ्गकलशपूजाङ्करिष्ये ।

उमामहेश्वरं सूत्रं सुगन्धि कुङ्कुमान्वितम् ।
निधाय तत्समीपे तु व्रतपूजापरायणः ॥

* * * *

पञ्चवक्रं सदानन्दमुमया सह शङ्करम् ।
आवाहयामि देवेशं व्रतसाफल्यहेतवे ॥
उमामहेश्वराय नमः आवाहनम् ।

End:

भुक्त्वा स विपुलान् लोकान् अन्ते (या)ति परं शिवम् ।
ते तस्य वचनं श्रुत्वा नैमिशारण्यवासिनः ॥
शिवलिङ्गार्चनरता व्रतमेतत्प्रचक्रमुः ।
प्रयान्ति शिवकैवल्यं व्रतेनानेन सुव्रताः ॥

Colophon:

इत्यार्षेयमहापुराणे ब्रह्मवैवर्तिकोमामहेश्वरव्रतकल्पं सम्पूर्णम् ॥

No. 8221. उमामहेश्वरव्रतकल्पः.
UMĀMAHEŚVARAVRATAKALPAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 99*a* of the MS. described under No. 2907.
Complete. From Skāndapurāṇa.
Similar to the above.

Beginning:

देवदेव जगन्नाथ सर्वसौभाग्यदायक ।
करिष्ये त्वद्व्रतं देव प्रसादं कुरु मे शिव ॥
उमामहेश्वरं सूत्रं कुङ्कुमाक्तं सदोरकम् ।
निधाय तत्समीपे तु व्रतपूजापरायणः ॥

End:

इह भुक्त्वा तु विमलान् सर्वान् भोगान् यथेप्सितान् ।
अनुभूय स देहान्ते प्रविशेत्परमां गतिम् ॥

Colophon:

इति स्कान्दपुराणे ब्रह्ममार्कण्डेयसंवादे उमामहेश्वरव्रतकल्पं सम्पूर्णम् ॥

No. 8222. उमामहेश्वरव्रतकल्पः.

UMĀMAHEŚVARAVRATAKALPAḤ.

Pages, 9. Lines, 4 on a page.

Begins on fol. 108*a* of the MS. described under No. 3055.

Complete. Wants beginning.

Similar to the above.

Beginning:

दशाङ्गं गुग्गुलुं धूपं गृहाण गगनाधिक ।
त्रैलोक्यपापतिमिरहन्त्रे तुभ्यं हरात्मने ॥
दीपं समर्पये देव त्रैलोक्यतिमिरापहम् ।
ज्योतिरङ्गाय भर्गाय ज्योतिषामाकराय च ॥

End:

कृत्वा पञ्चदशापूपान् ब्राह्मणाय निवेदयेत् ।
भुक्त्वा चाक्षारलवणं शम्भुं मनसि संस्मरन् ॥
धृत्वा दोरं करे सत्यं कथाः कृत्वा तथा व्रती ।
दशपञ्चसु वर्षेषु एवं कुर्याद्विचक्षणः ॥

No. 8223. उमामहेश्वरव्रतकल्पः.

UMĀMAHEŚVARAVRATAKALPAḤ.

Pages, 10. Lines, 6 on a page.

Begins on fol. 76*a* of the MS. described under No. 7758.

Complete.

Similar to the above.

Beginning:

सङ्कल्पमेवं कुर्वीत व्रतेनानेन सुव्रत ।
देवदेव जगन्नाथ सर्व(सौ)भाग्यवर्धन ॥

करिष्ये त्वद्व्रतं देव प्रसादं कुरु मे प्रभो । सङ्कल्पमन्त्रः ।
उमामहेश्वरं सूत्रं सुगन्धिं कुङ्कुमान्वितम् ।
निधाय तत्समीपे तु व्रती पूजापरायणः ॥
निधाय तत्समीपे तु दोरस्थापनमन्त्रतः ।
ध्यायेच्च दक्षिणावर्तिं वह्निचन्द्रार्कलोचनम् ॥

End:

उमामहेश्वरं नाम व्रतानामुत्तमं व्रतम् ।
यः करोति लिखेद्वापि यः शृणोति नरोत्तमः ।
तस्य मुक्तिरवश्यं हि सत्यं सत्यं वदाम्यहम् ॥

Colophon:

इति श्रीब्रह्मकैवर्तपुराणे उमामहेश्वरव्रतं सम्पूर्णम् ॥

No. 8224. उमामहेश्वरव्रतकल्पः.

UMĀMAHEŚVARAVRATAKALPAḤ

Pages, 4. Lines, 4 on a page.

Begins on fol. 49*a* of the MS. described under **No. 3055.**

Complete.

Similar to the above.

Beginning:

युधिष्ठिर उवाच—

केन धर्मेण नारीणां व्रतेन नियमेन च ।
सौभाग्यं जायते देव पुत्राश्च बहवः शुभाः ॥
धनधान्यसुवर्णञ्च वस्त्राणि(विविधानि) च ।
. . . . . गश्च लभते सततं पुत्रपौत्रयोः ॥

श्रीकृष्ण उवाच—

शृणु पार्थ प्रवक्ष्यामि व्रतानामुत्तमं व्रतम् ।
यत्कृत्वाशु . . . . जायते ॥
धनधान्यहिरण्यञ्च दासीदासादिकं बहु ।
उत्पद्यते गृहे येन तद्व्रतं कथयामि ते ॥

उमामहेश्वरं नाम अप्सरोभिः पुरा कृतम् ।
. . . . चान्यैः ऋषिकन्याभिरेव च ॥

End:

हैमीमुमां रजतपिण्डमयं महेशं रौप्यं सुरूपवृषभं समधिष्ठितौ वा ।
संपूज्य रक्तसितवस्त्रयुगा उभौ च नारी भवेदविधवा शतवर्षयुक्ता ॥

Colophon:

इति उमामहेश्वरव्रतकल्पं सम्पूर्णम् ॥

No. **8225.** उमामहेश्वरव्रतकल्पः.

UMĀMAHEŚVARAVRATAKALPAḤ.

Pages, 8. Lines, 4 on a page.

Begins on fol. 157*a* of the MS. described under No. 3055.

Incomplete.

Similar to the above.

Beginning:

कृत्वा पञ्चमुखं देवं कुशैः कुर्याद्विचक्षणः ।
वक्त्रे वक्त्रे त्रिभिर्दर्भैः पवित्रग्रन्थिसंयुतम् ॥
सङ्कल्पमेवं कुर्वीत मन्त्रेणानेन सुव्रत ।
देवदेव जगन्नाथ सर्वसौभाग्यवर्धन ।
करिष्ये त्वद्व्रतं देव प्रसादं कुरु मे प्रभो ।

End:

अथेन्द्रादिलोकपालान् पूजयेत् । देवस्योत्तरतो नन्दीश्वरमर्चयेत् । नमो रुद्राय शान्ताय कारणत्रयहेतवे.

No. **8226.** उमामहेश्वरव्रतकल्पः.

UMĀMAHEŚVARAVRATAKALPAḤ.

Pages, 12. Lines, 8 on a page.

Begins on fol. 47*a* of the MS. described under No. 5765, wherein this is mentioned as Umāmahēśvarapūjāvidhāna.

Complete. From Brahmōttarapurāṇa.

Similar to the above.

See under the previous number for the Beginning

End:

इह भुक्त्वा सुविपुलान् भोगान् सर्वान् यथेप्सितम् ।
आयुरारोग्यमैश्वर्यमिष्यन्ति परमं शुभम् ॥
ते सूतवचनं श्रुत्वा नैमिशारण्यवासिनः ।
शिवलिङ्गार्चनरता व्रतमेतत्प्रचक्रमुः ॥
मन्त्रहीनं क्रिया . . . . . तदस्तु मे ॥

Colophon:

इति ब्रह्मोत्तरपुराणे उमामहेश्वरव्रतकल्पः सम्पूर्णः ॥

No. **8227.** उमामहेश्वरव्रतकल्पः.

UMĀMAHĒŚVARAVRATAKALPAH.

Pages, 20. Lines, 7 on a page.

Begins on fol. 170*a* of the MS. described under **No. 7758,** wherein this has been omitted to be shown among the other works.

Complete.

Similar to the above.

Beginning:

देवदेव जगन्नाथ सर्वसौभाग्यदायक ।
करिष्ये त्वद्व्रतं देव प्रसादं कुरु मे प्रभो ॥

व्रतग्रहणम्—

No. 8736. क्षेत्रपालपूजा.

KṢĒTRAPĀLAPŪJĀ.

Substance, palm-leaf. Size, 14 × 2 inches. Pages, 2. Lines, 8 on a page. Character, Kanarese. Condition, slightly injured. Appearance, old.

Begins on fol 1a. The other works herein are Vāstudēvatāpūjā 2r, Vimānaśuddhi 3a, Jinālayābhiṣēkādipūjā 7b, Jainamantrayantrapūjā 16b, Jinayajñakalpa 25a, Jinasaṁhitā 37a, Jinakriyāsaṁskāra 42a, Jinayantrārcanakrama 45a.

The first leaf is wanting.

Incomplete

Deals with the manner of worshipping Kṣētrapāla or the guardian deity of a place.

Beginning:

(ओं ह्री क्षेत्रपा)लाय गन्धानुलेपनं करोमि स्वाहा । ओं ह्री क्षेत्रपालाय कौसुम्भवस्त्रवेष्टनं करोमि स्वाहा । ओं ह्रीं क्षेत्रपालाय नैवेद्यं समर्पयामि स्वाहा । (ओं ह्रीं क्षेत्रपाला)य इदमर्घ्यं पाद्यं जलं गन्धमक्षतं पुष्पं दीपं धूपं चरुं बलिं फलं स्वास्तिकं यज्ञभागं ददामहे प्रतिगृह्यतां प्रतिगृह्यतामिति स्वाहा ।

End:

ओं ह्री क्षेत्रपालाय गुडार्पणं करोमि स्वाहा । ओं ह्री क्षेत्रपालाय पुष्पमालारोपणं करोमि स्वाहा ओं श्री क्षेत्र . . . .

No. 8737. जिनपादपूजा.

JINAPĀDAPŪJĀ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 41a of the MS described under No. 8735

Complete.

Deals with the manner of worshipping the feet of Jina.

Beginning:

. . . . भव्यतोयैर्गाङ्गेयमुक्ताज्ज्वलकुम्भपूर्णैः ।
शीतांशुशीतैर्भवतापहारैः संपूजयामो जिनपादपद्मौ ॥
ओं ह्रीं नमः परमेष्ठिभ्यः स्वाहा जलम् ।
काश्मीरिकालागरुपुष्पकेन्दुव्यामिश्रितानुत्तमगन्धसारैः ।
तापापनोदैः सुरभीकृताशैः संपूजयामो जिनपादपद्मौ ॥
ओं ह्रीं अर्हन्नमः परमात्मकेभ्यः स्वाहा गन्धः ।

End:

देवेन्द्रवृन्दमणिमौलिसमर्चिताङ्घ्रेः देवादिदेवपरमेश्वरकीर्तिभाजः ।
पुष्पायुधप्रमथनस्य जिनेश्वरस्य पुष्पाञ्जलिर्विरचितोऽस्तु विनेयशान्त्यै ॥
ओं ह्रीं हं ध्यातृभिरभीप्सितफलदेभ्यः स्वाहा ॥ पुष्पाञ्जलिः ।

No. 8738. जिनपूजाक्रमः.

JINAPŪJĀKRAMAḤ.

Substance, palm-leaf. Size, 7¼ × 1¼ inches. Pages, 19. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 73*a*. The other works herein are Jinasahasranāmastōtra 1*a*, Bhaktāmarastōtra 14*a*, Bhūpālastōtra 21*a*, Viṣāpaharaṇastōtra 26*a*, Kalyāṇastava 31*b*, Jainadharmōpadēśa (Maṇipravāḷa) 38*a*, Jainēndrayajñavidhi 42*a*, Saṅkalpapuṇyāhavācana 51*a*, Tīrthakarapūjā 58*a*, Pārśvanāthamantrapūjā 68*a*, Tīrthakarayajñakrama 83*a*, Padmāvatīsahasranāmastōtra 91*a*, Brahmayakṣastōtra 108*a*, Brahmayakṣaśataka 110*a*, Śabaramantra (Tamil) 114*a*, Śrījvālinīstōtra 118*a*.

Incomplete.

Deals with the manner of conducting the worship of Jinas.

Beginning:

वृषं वृषभसेनाद्याः सिंहसेनादयो जिनम् ।
शंभवं चारुषेणाद्या वज्रनाभिपुरःसराः ॥

* * * *

श्रीहस्तिनागनगराधिपविश्वसेनप्रेमाकुलैरात्वनिचारुरत्नः ।
एणाङ्कचक्रेश्वरतीर्थनाथः त्वां पूजयामो वरशान्तिनाथः ॥
ओं ह्रीं शान्तिजिनदेव अत्रावतर स्वाहा ।
श्रीमत्कुण्डपुराधिनाथविलसत्सिद्धार्थभूवल्लभः
प्रेमार्द्रा प्रियकारिणी प्रियसुतः संप्रार्थ्यते सन्मतिः ।
पद्मास्योल्लतकेतनः कनकरुग्मातङ्गसिद्धायिनी
माणिक्याभरणाभिरञ्जितपदप्रोत्फुल्लपङ्केरुहः ॥
ओं ह्रीं वर्धमानजिनदेव अत्रावतर स्वाहा ॥

End :

जयरामारमणस्य सुग्रीवस्य च सूनुकम् ।
पुष्पदन्तं यजे यज्ञे पुष्पदन्तसमप्रभम् ॥
ओं ह्रीं पुष्पदन्तजिनदेव ।
त्रिकालाद्यनभिज्ञानः चिरं कुर्वन् जपं स्तवम् ।
षट्कर्मणां न चाप्नोति मन्त्रसिद्धिं कदाचन ॥

No 8739. जिनयज्ञकल्पः.
JINAYJÑAKALPAḤ.

Substance, palm-leaf. Size, 17½ × 1¾ inches. Pages, 31. Lines, 7 on a page. Character, Kanarese. Condition, slightly injured. Appearance, old.

Begins on fol. 16. The other works herein are Pañcadaśatithi-dēvatārcana 1a, Jainābhiṣēkādividhāna.

Similar to the above. This work is said to have been composed by Āśādhara.

The subjects treated of herein are—

रत्नवृष्टिस्थापनम्.	परिचर्यास्थापनम्.
पीठपूजा.	निष्क्रमणकल्याणस्थापनम्.

जिनकल्याणस्थापनम्.	मन्त्रन्यासविधानम्.
तिलकादानविधानम्.	स्वस्त्ययनदानम्.
अष्टचत्वारिंशत्संस्कारमा- लारोपणम्.	समवसरणस्थापनम्.

Beginning:

अथ विविक्तदेशस्थः प्रतिष्ठाचार्यकुञ्जरः ।
प्रतिष्ठाविषये कुर्यात्परिकर्मेदमाहतः ॥
प्रागेकां शुभसद्धार्यों प्रातिहार्यादिशालिनीम् ।
परीक्षाय सुरम्यार्चा प्रतिष्ठेयं(यां) निरूपयेत् ॥

* * * *

रत्नवृष्टिस्थापनम् –

सार्वर्तुकानि वरवस्त्रफलप्रसूनशय्याशनासनविलेपनमङ्गलानि ।
तत्तत्क्रियोपकरणानि तदीप्सितानि तीर्थेश मातुरुपदीकुरुताज्जिनेशः ॥

End:

अप्यङ्गुष्ठमितामनेन विधिना जैनीं प्रतिष्ठाप्य ये
शक्त्या तां प्रतिमां भजन्ति विधिवन्नित्याभिषेकादिभिः ।
तेऽर्हद्भक्तिदृढानुरञ्जितधियो मुक्त्वा शिवाशादर-
श्रावण्योऽभ्युदयावलीरनुभवन्त्यात्यन्तिकीं निर्वृतिम् ॥

Colophon:

इत्याशाधरविरचिते प्रतिष्ठासारोद्धारे जिनयज्ञकल्पनाम्नि जिनप्रति-
ष्ठाविधानीयो नाम चतुर्थोऽध्यायः ॥

No. 8740. जिनयज्ञकल्पः.
JINAYAJÑAKALPAḤ.

Pages, 24. Lines, 8 on a page.

Begins on fol. 25*a* of the MS. described under No. 8736

Incomplete.

Deals with the manner of conducting the worship of Jinas.

Beginning:

जिनान् नमस्कृत्य जिनप्रतिष्ठा शास्त्रोपदेशव्यवहारदृष्ट्या ।
श्रीमूलसङ्घे विधिवन्न(न्म)बुद्धान् भव्यान् प्रवक्ष्ये जिनयज्ञकल्पम् ॥

* * * *

जिनानां यजनं यज्ञस्तस्य कल्पः क्रियाक्रमः ।
तद्वाचकत्वाच्च जिनयज्ञकल्पोऽयमुच्यते ॥

अथातस्तीर्थोदकाधानविधानमनुवर्णयिष्यामः—

दत्वा पद्माकरायार्घ्यं वास्तुदेवाय चावनिन् ।
संमार्ज्य वायुभिर्मेघैः प्रोक्ष्य पूताग्निनोरगान् ॥

End:

द्रां द्रीं हं सः स्वाहा । आचमनम् । ओं भूः भुवः सुवः असि आदेसार्हन् । प्राणायामं करोमि स्वाहा । त्रिरुचार्य प्राणाना(यम्य) ।

No. 8741. जिनयन्त्रार्चनक्रमः.
JINAYANTRĀRCANAKRAMAḤ

Pages, 2. Lines, 8 on a page.

Begins on fol. 45*a* of the MS. described under No 8736.

Incomplete.

The manner of conducting the worship of the mystic diagram is given here. This is considered to have the power of ensuring, by means of the Mantras repeated by the worshipper, the accomplishment of his desired objects.

Beginning:

स्वयंभुवं महादेवं ब्रह्माणं पुरुषोत्तमम् ।
जिनेन्द्रचन्द्रमानम्य वक्ष्ये यन्त्रार्चनक्रमम् ॥
सिषाधयिषुणा विद्यामविघ्नेनेष्टसिद्धये ।

* * * *

स्वाहेति स्नानमन्त्रोऽयं मन्त्रविद्भिः प्रकीर्तितः ।
एवं स्नानपवित्राङ्गो धौतवस्त्रपरिग्रहः ।
स्थित्वा संमार्जितैकान्तप्रदेशे देशसंयमी ॥

End:

प्राग्भागे शिरसो मूर्ध्नि दक्षिणे पश्चिमे तथा ।
वामे चेत्येष विन्यासक्रमो वारे द्वितीयके ॥
भुजयुग्मे च नाभौ च पार्श्वयुग्मे तृतीयके ।
कवचाख्यं तनून्यासं कुर्यान्मन्त्रेण मन्त्रवित् ॥
ओं ह्रीं नो अर्हत्ताणं हृदयाय न . . . .

No. 8742. जिनसंहिता (कर्णाटकटिप्पणसहिता).

JINASAMHITA (WITH KANARESE MEANING).

Substance, palm-leaf. Size, 12¾ × 1⅝ inches. Pages, 250. Lines, 5 on a page. Character, Kanarese. Condition, good. Appearance, old.

Incomplete.

Begins on fol. 8*a*. The other work herein is **Yakṣayakṣilakṣaṇa** (Kanarese) 1*a*.

A treatise dealing with the manner of worship to be conducted in Jina temples. This is attributed to Mahāvīra or Vardhamāna. He is stated to have taught this work to the king of Magadha in Vipulādri. The author of the Kanarese commentary is Vādi Kumudacandramunīndra, son of Māghanandi-Siddhānta-Cakravartin. The commentator calls the work also by the name of Pratiṣṭhākalpa.

The following is a list of the subjects dealt with in the work:—

१. पूज्यपूजकपूजकाचार्यपूजाफलप्रतिपादनम्.
२. त्रैवर्णिकाचारविधिः.
३. सकलीकरणविधिः.
४. ध्वजारोहणविधिः.
५. अङ्कुरार्पणविधिः.
६. विमानशुद्धिः.
७. होमविधिः.
८. वेदिकाविधानम्.
९. अभिषेकमण्डपविधानम्.

Beginning:

श्रीमाघनन्दिसिद्धान्तचक्रवर्तितनूभवः ।
कुमुदेन्दुरहं वच्मि प्रतिष्ठाकल्पटिप्पणम् ॥

विज्ञानं विमलं यस्य भासते विश्वगोचरम् ।
नमस्तस्मै जिनेन्द्राय सुरेन्द्राभ्यर्चिताङ्घ्रये ॥

* * * *

एवं जिनगुणस्तोत्रकृतमङ्गलसत्क्रियः ।
संग्रहीष्यामि भव्येभ्यो हिताय जिनसंहिताम् ॥
शास्त्रावतारसंबन्धः प्रथमं प्रतिपद्यते ।
श्रेयोऽर्थिनः समाधाय चेतः शृणुत धीधनाः ॥
इति स श्रूयते वीरश्चरमस्तीर्थनायकः ।
विपुलाद्रौ सभां दिव्यामध्युवास कदाचन ॥
तत्रासीनं तमभ्येत्य वन्दित्वा मगधेश्वरः ।
उपेत्य गणभृज्ज्येष्ठमप्राक्षीज्जिनसंहिताम् ॥
चराचरजगद्बन्धुस्ततस्तां जिनसंहिताम् ।
भगवान् गौतमः स्वामी मागधं प्रत्यबूबुधत् ॥
ततः प्रभृत्यविच्छिन्नसर्गपर्वक्रमागता ।
मयाऽधुना यथोक्तेन संहिता संप्रकाश्यते ॥
मागधप्रश्नमुद्दिश्य गौतमः प्रत्यवोचत ।
इतीदमनुसंधाय प्रबन्धोऽयं निबध्यते ॥
संगतं हितमेतस्या भव्यानामिति संहिता ।
जिनसंबन्धिनी सेयं नाम्ना स्याज्जिनसंहिता ॥
हितार्थिनो ये जिनसंहितामिमां
पठन्तु ते श्रद्दधतः सहादरम् ।
प्रकाशितां विश्वपदार्थदर्शिभिः
प्रमाणभूतैर्वृषभैः कवीश्वरैः ॥
पूज्यं पूजार्हमर्हन्तं प्राप्त्यपायादिसंपदम् ।
प्रणिपत्य प्रवक्ष्यामि पूजासारसमुच्चयम् ॥

पूज्यो जिनपतिः पूजा पुण्यहेतुर्जिनार्चना ।
फलं साभ्युदया मुक्तिः भव्यता पूजकः स्मृतः ॥

* * * *

प्रशस्तलक्षो यदि पूजयेत्पुमान्
जिनेन्द्रमिन्द्रार्चितपादपङ्कजम् ।
पुरं च राष्ट्रं च नृपश्च वर्धतां
स्वयं जिनः कारयताच्च वर्धताम् ॥

Colophon:

इति श्रीमाघनन्दिसिद्धान्तचक्रवर्तितनूभवचतुर्विधपाण्डित्यचक्रवर्ति-श्रीवादिकुमुदचन्द्रमुनीन्द्रविरचिते जिनसंहिताटिप्पणे पूज्यपूजकपूजकाचार्यपूजाफलप्रतिपादनं समाप्तम् ॥

End:

अथैवं वेदिकाविधानं परिसमाप्य तत्तन्मालामन्त्रैः पञ्चोपचारविधिना वेदिकायां लिखितदलकोष्ठनिवासिदेवान् पञ्चगुरुमुख्यान् समाहूय सस्थाप्य संनिधीकृत्य संपूज्य वेदिकामलंकृत्य ॥

Colophon:

इति श्रीमाघनन्दिसिद्धान्तचक्रवर्तिसुतचतुर्विधपाण्डित्यचक्रवर्तिश्रीवादिकुमुदचन्द्रपण्डितदेवविरचिते प्रतिष्ठाकल्पटिप्पणे वेदिकाविधानं समाप्तम् ॥

* * * *

ओं केवलावबोधार्को द्योतयत्यखिलं जगत् ।
यस्य तत्पादपीठाग्रे दीपान् (संदीप)याम्यहम् ॥

No. 8743. जिनसंहिता.
JINASAṀHITĀ.

Pages, 11. Lines, 8 on a page.

Begins on fol. 37*a* of the MS. described under No. 8736.

Up to the end of Śaucavidhi.

Same as the above. Contains the text only.

No. 8744. जिनालयाभिषेकादिपूजा.
JINĀLAYĀBHIṢEKĀDIPŪJĀ.

Pages, 18. Lines, 8 on a page.

Begins on fol. 7*b* of the MS. described under No. 8736.

Incomplete.

Contains the manner of conducting the Abhiṣēka or the ceremonial bathing of Jina's images in Jaina temples.

Beginning:

गङ्गाप्रभृत्यखिलतीर्थनदीतटाक-
कासारिकूपसकलार्णवतोयपूर्णैः ।
दामां सुवर्णकलशैरभिषेचयामि
संसारदुःखपरितापनिवारणानि(य) ॥

* * * *

स(रि)त्तीर्थाम्बुधाराभिर्मव्यसस्याभिवृद्धये ।
कृत्रिमाकृतिमान् सर्वान् पूजयामि जिनालयान् ॥

End:

तां पूजां त्रिजगत्प्रमोक्षिजगतीकालत्रयीवर्तिनीं
सिद्धीं सिद्धवधूसमागमसुखस्याद्यानुमोदामहे ॥
इत्यन्वहं कृतपुरश्चरणः शरण्यां
भक्त्याभिषिच्य परयार्चति यो जिनार्चा(म्) ।

No. 8745. जिनेन्द्रपूजा.
JINENDRAPŪJĀ.

Pages, 10. Lines, 5 on a page.

Begins on fol. 57*a* of the MS. described under No. 8735.

Complete.

Similar to the above.

Beginning:

श्रीमन्मन्दरमस्तके शुचिजलैर्धौते सदर्भाक्षते
पीठे मुक्तिवरं निधाय रचितं तत्पादपुष्पस्रजा ।

इन्द्रोऽहं निजभूषणार्थममलं यज्ञोपवीतं दधे
मुद्राकङ्कणशेखरानपि तथा जैनाभिषेकोत्सवे ॥

ओं ह्रीं स्वस्तये श्रीपीठमारोपयामि स्वाहा । ओं ह्रीं हं क्षं ठ श्रीपीठस्थापनं करोमि स्वाहा ॥

* * * *

इन्द्राग्न्यन्तकनैर्ऋतोदधिमरुद्यक्षेशशेषोडुपा-
नाहूतान्निजवाहनायुधवधूयुक्तान् सुसंस्थाप्य तान् ।
अर्घ्यैस्वस्तिकयज्ञभागचरुकैरोंभूर्भुवस्स्वःस्वधा-
स्वाहा चेत्यभिमन्त्रितैः प्रतिदिशं संतर्पयामः क्रमात् ॥

दशलोकपालकदेवताह्वानम् ।

End:

भव्यानां भुवनैकराममहिमाभाजां सपर्याविधेः
कर्तॄणां परिपालकक्षितिभृतां राज्ञां यतीनां तथा ।
देशग्रामपुराकराभिजनतासंसेव्यविश्वंभरा-
चक्रस्याप्यखिलेन्द्रवन्दितवपुः शान्तिं प्रकुर्याज्जिनः ॥

ओं ह्रीं स्वस्ति भवतु जगतां शान्तये शान्तिधारां निष्पादयामि शान्तिकृद्भ्यः स्वाहा ॥

No. 8746. जैनपूजा.

JAINAPŪJĀ.

Substance, palm-leaf. Size, 7⅜ × 1⅜ inches. Pages, 24. Lines, 5 on a page. Character, Kanarese. Condition, slightly injured. Appearance, old.

Begins on fol. 22*b*. The other works herein are Jinastōtra 1*a*, Śāntyaṣṭaka 5*b*, Samantabhadrastōtra 8*a*, Jainasuprabhāta 11*a*, Svapnastava 13*b*, Vardhamānastava 15*b*, Candraprabhastōtra 17*a*, Vṛṣabhāṣṭaka 17*b*, Jainācāryanāmāni 19*a*, Nirvāṇabhakti 35*a*, Vāstudēvatāpūjā 41*a*, Jvaraśāntiyantrapūjā 45*b*, Ṣaṭkarmastava 48*b*, Sarasvatīpūjā 52*b*.

Complete.

Contains the manner of worshipping the 24 Tīrthaṅkaras.

Beginning:

श्रीमत्सो(च्छ्री)पद्भावनापरिलसत्पूजाविधानं महत्
भूतानागतवर्तमानजिनपां द्वासप्तति भक्तितः ।
मुक्तिश्रीपरिरम्भनिर्भरपरीरम्भान्नमस्कृत्य ते (त)
द्दे(ब)श्ये ऽहं मम हत्सरोजनिवहं(द्दे) तेषां पदं(द) प्राप्तये ॥

विधियज्ञप्रतिज्ञानाय प्रतिमोपरि पुष्पाक्षतं क्षिपेत् ।

* * * *

भूतादिकालोदितभव्यपुण्यादाराधिता यन्त्रसुरेन्द्रवृन्दचै ।
तां(तान्) पञ्चकल्याणविभूतिभाज(जः) तीर्थकरान् सांप्रतमर्चयामि ॥

ओं निर्वाणाद्यतीतकालचतुर्विंशतितीर्थकरपरमदेवेभ्य अत्र एहि ।
आह्वानस्थापनसंनिधीकरणम्—

मरुत्तरङ्गिणीजलैर्मरुत्तदिन्द्रवन्दितान् ।
नतीततीर्थनायकानतीतसंस्कृतीन् यजे ॥ जलम् ।
सुगन्धसारचर्चया सुगन्धचन्द्रमिश्रया ।
नतीततीर्थनायकानतीतसंस्कृतीन् यजे ॥ चन्दनम् ।

End:

अर्हदाचार्यभक्तिबहुश्रुतप्रवचनभक्तिभावस्य का(म)परिहाणमार्गप्रभावनाप्रवचनवत्सलत्वमिति तीर्थकरार्थषोडशकारणेभ्यः पूर्णार्घ्यं निर्वपामि स्वाहा ॥

Colophon:

समाप्तम् ॥

No. 8747. जैनपूजाविधानम्.
JAINAPŪJĀVIDHĀNAM.

Substance, palm-leaf. Size, 13 × 1⅜ inches. Pages, 60. Lines, 5 on a page. Character, Kanarese. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Vastupadanyāsavidhi 31*a*, Candraprabhāgadya 75*a*, Jaināсāryapraśaṁsā 81*a*,

Sarvacaityālayapūjā 85a, Sarvadēvatājayamālā 94b, **Yakṣidēvatārcana** 96a, Pañcamaṇḍalārādhanavidhāna 99b.

Incomplete.

Describes the manner of worshipping the images of Jinas.

Beginning :

श्रीआदिनाथाय नमः ।

संकल्प्याभिषवं विशोध्य भुवमास्थाप्यात्र दर्भान् घुटान्
पीठं बिम्बमिहार्हतं जिनमुपास्याष्टासनादिक्रमैः ।
दिक्पालान् परिपूज्य सज्जलमुखेनान्यैः कषायोदकैः
संस्नाप्यान्ववतार्य कोणकलशैर्गन्धोदकैः स्नापयेत् ॥

विधियज्ञप्रतिज्ञापनाय पुष्पाञ्जलिः . . . . . .

जिनानामपि सिद्धानां महर्षीणां समर्चनात् ।
पाठात् स्वस्त्ययनस्यापि पुनः पूर्वं प्रसादयेत् ॥

पुनः प्रसाविविधानसूचनार्थमर्चनपीठाग्रतः पुष्पाञ्जलिं क्षिपेत् ।

End :

सिद्धपरमेष्ठिने नमः स्वाहेत्यादि । अथ कर्णिकायामनर्चादिशि आचार्यपरमेष्ठिपूजा ।

कुमततिमिरसूर्यान् सारगाम्भीर्यधैर्यान्
परहितनिजकार्यान् पञ्चभेदोद्धचर्यान् ।
विनयवन[वि]विधीयान् पूजयाम्याहृतार्यान्
मुनिजनपरिवार्यान् श्रीमदाचार्यवर्यान् ॥

No. **8748.** जैनमन्त्रयन्त्रपूजा.

JAINAMANTRAYANTRAPŪJĀ.

Pages, 14. Lines, 8 on a page.

Begins on fol. 16b of the MS. described under No. 8736.

Complete.

Deals with the manner of conducting the worship of Jinas with the aid of Mantras and Yantras (mystic diagrams).

Beginning:

निष्ठाप्यैवं जिनानां सवनविधिमनुप्राच्यभूभागमन्यं
पूर्वोक्तैर्यन्त्रमन्त्रैरिह भुवि विधिनाराधनापीठयन्त्रम् ।
कृत्वा सच्चन्दनाद्यैर्वसुदलकमलं कर्णिकायां जिनेन्द्रान्
प्राच्यां संस्थाप्य सिद्धानितरदितिगुरून्मन्त्ररूगान् विधाय ॥
जैनं धर्मागमार्चानिलयमपि विदिश्यत्र मध्ये लिखित्वा
बाह्ये कृत्वाथ चूर्णैः प्रविशदशदकैः पञ्चकृन्मण्डलानाम् ।
तत्र स्थाप्यास्तिथीशा ग्रहसुरपतयो यक्षयक्षीः क्रमेण
द्वारेशा लोकपाला विधिवदिह महं यन्त्रतो व्याह्रियन्ते ॥

End:

स्फुरिततरतनुश्रीः ह्रीलसद्धृत्युपेता
द्युतिमतिविजयाः सत्कीर्तिलक्ष्मीश्च पश्चात् ।
विधुतविविधभूषाविद्रुमद्योतदेहाः
जिनपतिसवनेऽस्मिन् व्याह्वये दिक्पुरन्ध्रीः ॥
ओं ह्रीं क्रों वाराहे श्रीह्रीधृतिद्युतिमतिकीर्तिबुद्धिलक्ष्म्य आगच्छत ।
यस्यार्थे क्रियते पूजा तस्य शान्तिर्भवेत्सदा ।

Colophon:

कलशाभिषेकस्नपनयन्त्रपूजा समाप्ता ॥

No. 8749. जैनमहाभिषेकपूजा.
JAINAMAHĀBHIṢEKAPŪJĀ.

Pages, 17. Lines, 5 on a page.

Begins on fol. 44*a* of the MS. described under No. 8735.

Complete.

Gives the manner of conducting the ceremonial bathing of the image of Jina: by Pūjyapāda

Beginning:

आचम्यार्हन्तमादावहमपि विहितस्नानशुद्धिः पवित्रैः
तोयैः सन्मन्त्रयन्त्रैर्जिनपतिसवनाम्भोभिरप्यात्तशुद्धिः ।
आचम्यार्घ्यं च कृत्वा शुचिधवलदुकूलान्तरीयोत्तरीयः
श्रीचैत्यावासमानौम्यदनतिविधिना त्रिः परीत्य क्रमेण ॥
द्वारं चोद्घाट्य वक्त्राम्बरमपि विधिनिर्वाप्यवाल्यां च शुद्धिं
कृत्वाहं सिद्धभक्तिं बुधनुतसकलीसत्क्रियां चादरेण ।
श्रीजैनेन्द्रार्चनार्थं क्षितिमपि यजनद्रव्यपात्रात्मशुद्धिं
कृत्वा भक्त्या विशुद्ध्या महमहमधुना प्रारभेयं जिनस्य ॥

End:

पुण्याहं घोषयित्वा तदनु जिनपतेः पादपद्मार्चितां श्री-
शेषां सूत्रार्थं मूर्ध्ना जिनपतिनिलयं त्रिः परीत्य विशुद्ध्या ।
आनम्येशं विसृज्यामरगणमपि यः पूज्यते पूज्यपादः
प्राप्नोत्येवाशु सौख्यं भुवि दिवि विबुधा देवनं दीपितश्रीः ॥

Colophon:

इति श्रीपूज्यपादविरचितः जैनमहाभिषेकः समाप्तः ॥

No. 8750. जैनवाग्देवतापूजा.
JAINAVĀGDĒVATĀPŪJĀ.

Pages, 5. Lines, 7 on a page.

Begins on fol. 32b of the MS. described under No. 8734.

Complete.

Describes the manner of conducting the worship of the goddess, presiding over the Jaina learning.

Beginning:

श्रीमत्पुण्यधुनीप्रवाहधवलां स्थूलोच्चलच्छीकरै
रालीनालिकुलानि कल्मषधियैवोत्सारयन्तीं मुहुः ।
नीलाम्भोरुहवासितोदरलसद्भृङ्गारवालंकृतां
वार्धारां श्रुतदेवतार्चनविधौ संपादयाम्यादरात् ॥

श्रीमन्नन्दनचन्दनद्रुमभवश्रीखण्डसारोद्भवैः
सद्यः पीडितबाल्यकुङ्कुमरसैः कर्पूरसंमिश्रितैः ।
वाग्देवीमभितोऽद्भुमाद्भिरखिलैर्मत्तालिझंकारितै
र्योव(य)ज्मि श्रुतदेवतामभिमतैर्गन्धैर्मनोनन्दनैः ॥

* * * *

श्रीमद्भिः कलधौतपात्रविहितैः पीयूषपिण्डोपमैः
पुण्यानामिव राशिभिश्चरुवरैरत्योद्वद्भिर्भृशम् ।
प्राज्यक्षरिवृतप्रभूतदधिभिः संमिश्रितैः पावनैः
वाग्देवीं तु सुरासुरैरपाचितां जैनेश्वरीं प्रार्चये ॥

End:

जिनेन्द्रवक्त्रप्रतिनिर्गतं वचो यतीन्द्रभूतिप्रमुखैर्गणाधिपैः ।
श्रुतं धृतं तैश्च पुनः प्रकाशितं द्विषट्प्रकारं प्रणमाम्यहं श्रुतम् ॥

* * * *

गमणं समाहि मरणं जिणगुणसंपत्तिहोउमज्झं ॥

No. 8751. जैनसामयिकव्रतम्.
JAINASĀMAYIKAVRATAM.

Pages, 4. Lines, 7 on a page.

Begins on fol. 106 of the MS. described under No. 8734.

Complete.

This Vrata consists in taking up a vow to regard all beings equally; and the manner of conducting the Pūjā in relation to it is also given.

Beginning:

भगवन् नमोऽस्तु ते । एषोऽहं देववन्दनां कुर्याम् । अथ सामयिकस्वीकारः ॥

नमोऽस्तु धूतपापेभ्यः सिद्धेभ्योऽपि पदे पदे ।
सामायिकं प्रपद्येऽहं भवभ्रमणसूदनम् ॥
समता सर्वभूतेषु संयमः शुभभावनः ।
आर्तरौद्रपरित्यागः तद्धीः सामायिकव्रतम् ॥

साम्यं मे सर्वभूतेषु वैरं मम न केनचित् ।
आशाः सर्वाः परित्यज्य समाधिमहमाश्रये ॥
सिद्धं संपूर्णभव्यार्थं सिद्धेः कारणमुत्तमम् ।
प्रशस्तदर्शनज्ञानचारित्रप्रतिपादकम् ॥
नरेन्द्रमकुटाश्लिष्टपादपद्मांशुकेसरम् ।
प्रणमामि महावीरं लोकत्रितयमङ्गलम् ॥

End:

आश्रित्य स्नपनं विशोध्य तदिलां पीठं(ठ्यां) चतुःकुम्भयुक्-
कोणायां सकुशश्रियां जिनपतिं न्यस्यान्तमाप्ये(प्ये)ष्टदिक् ।
नीराजाम्ब(म्बु)रसाज्यदुग्धदधिभिः सिक्त्वा कृतु(कृतो)द्वर्तनं
सिक्तं कुम्भजलैश्च गन्धसलिलैः संपूज्य नुत्वा स्मरेत् ॥
शीताम्भोभिः सुगन्धैः प्रविशदशदकैः हारिपुष्पैर्वराज्ञैः
सद्दीपैश्चारुधूपैर्मधुरतरफलैश्चार्चयामो जिनेन्द्रम् ।
कुर्मः पुष्पाञ्जलिं तं प्रतिभमर(टपट)हार्थैस्ततः पूजयामः
पाथोभिः पातयामस्तदनु त्रिजगतां शान्तये शान्तिधाराम् ॥

No. 8752. जैनहोमोत्सवपूजा.

JAINAHÔMÔTSAVAPÛJÂ.

Pages, 38. Lines, 5 on a page.

Begins on fol. 22*a* of the MS. described under No. 8735.

Complete.

Gives the manner of conducting the worship subsidiary to the Jaina ritual called Hômôtsava.

Beginning:

श्रीशान्तिनाथममरासुरमर्त्यनाथ
भास्वत्किरीटमणिदीधितिधौतपादम् ।
त्रैलोक्यशान्तिकरणप्रवणं प्रणम्य
होमोत्सवाय कुसुमाञ्जलिमुत्क्षिपामि ॥

ओं ह्रीं श्रीं क्षी भूः स्वाहा । होमप्रस्तावनपुष्पाञ्जलिः ।

भेरीगम्भीरनादप्रवितलकहलाझल्लडकामृदङ्ग-
प्रध्मातध्वानघण्टाझणझणरवसज्झर्झरादीप्रघोषैः ।
रङ्गद्दङ्कातरङ्गोद्भवतुमुलरवाशक्ति (क्ति)तैः क्षुभ्यदब्धि-
ध्वानानेकैः प्रगर्जद्धनरवसदृशैः श्रीजिनाङ्घ्री यजामः ॥

ओं ह्रीं वाद्यमुद्घोषयामि स्वाहा । पुष्पाक्षतविक्षेपणाद्वादकेन बहि-र्वाद्यमुद्घोषणम् ।

End:

औदासीन्यसुशक्तिसंयतमतिक्रोधाद्यभिभावोल्लस
ज्जीवव्रातविकारदोषहननं कर्मक्षयोत्पादकम् ।
देवेन्द्रादिनमस्क्रियासमुचितं संसारदुःखापहं
साक्षान्मोक्षसुखप्रदं प्रविमलं चारित्रमर्चामहे ॥

अर्हत्सिद्धाः सूरयः पाठकेन्द्राः
सर्वेऽप्येते साधवः साधुवन्द्याः ।
सम्यग्दृष्टिज्ञानचारित्रयुक्ताः
श्रेयः कुर्वन्त्वर्चिताः सज्जनानाम् ॥ पूर्णार्घ्यम् ॥

No. 8753. जैनाभिषेकादिविधानम्.
JAINĀBHIṢEKĀDIVIDHĀNAM.

Pages, 11. Lines, 7 on a page.

Begins on fol. 17*b* of the MS. described under No. 8740.

Incomplete.

Gives the manner of conducting the ceremonial bath of the images of Jina.

Beginning:

अथातोऽभिषेकादिविधा(ना)न्यनुसूत्रयिष्यामः—

तद्यथा—

आश्रित्य स्नपनं विशोध्य तदिलां पीठ्यां चतुःकाणयुक्-
कोणायां सकुशश्रियां जिनपतिं न्यस्यान्तमाप्येष्टदिक् ।

नीराज्या(जा)म्बुरसाज्यदुग्धदधिभिस्सिक्त्वा कृतोद्वर्तनं
सिक्तं कुम्भजलैश्च गन्धसलिलैः संपूज्य नुत्वा स्मरेत् ॥

इत्यभिषेकविधानम् ।

* * * *

जिनपूजार्थं समाहूता देवास्सर्वे विहितमहामहाः स्वस्थानं गच्छत जः इति विसर्जनमन्त्रोच्चारणेन यागमण्डले पुष्पाञ्जलिं विकीर्य देवान् विसर्जयेत् ।

End:

पूर्वस्यां दिशि ध्वजमवस्थाप्य शतं देवतामित्थं प्रतिष्ठयेत् । . .
सर्वाह्णयक्ष अत्र तिष्ठ ठ इत्यादि.

No. 8754. जैनाराधनाविधिः.

JAINĀRĀDHANAVIDHIḤ.

Substance, palm-leaf. Size, 13¼ × 1¼ inches. Pages, 62. Lines, 5 on a page. Character, Kanarese. Condition, good. Appearance, old.

Begins on fol. 64*a*. The other works herein are Śāntihōmōtsavavidhi 1*a*, Grahastōtra 40*a*, Maṅgalastōtra 42*b*, Sthānasaptakanirūpana 45*b*, Vivāhaprayōga 47*a*, Tīrthakarapūjāvidhāna 94*b*.

Complete.

The manner of worshipping the image of Jina is given here.

Beginning:

रागादिदोषरहितं सुरराजवन्द्यं
नत्वा जिनेशमखिलामलयोगिसेव्यम् ।
पुष्पाञ्जलिं जिनमुखे वयमुत्क्षिपामः
श्रीमूलसङ्घवरभव्यजनप्रशान्त्यै ॥

ओं परमब्रह्मणे नमो नमः । स्वस्ति, जीव, नन्द, वर्धस्व, विजयस्व, अनुशाधि, पुनीष(हि), पुण्याहं माङ्गल्यं पुष्पाञ्जलिं स्वाहा ।

* * * *

जिनेन्द्रयागवेलायां पूजाद्रव्यैर्जलादिकैः ।
ईशानदिङ्मुखे नित्यं वास्तुदेवं यजाम्यहम् ॥

End:

ओं ह्रीं श्री क्लीं ऐं अर्हमिदं पुष्पाञ्जलि प्रार्चनमिदं गृहीष्वम् । नमोऽर्हद्भ्यः स्वाहा ।

शक्रचक्रधराहीन्द्रार्चिताङ्घ्रियुगाम्बुजः ।
पायादपायाद्भव्यौघं श्रीपतिः श्रीजिनः सदा ॥

आशीर्वादः ॥

No. 8755. जैनेन्द्रयज्ञविधिः.
JAINENDRAYAJÑAVIDHIḤ.

Pages, 18. Lines, 7 on a page.

Begins on fol. 42*a* of the MS. described under No. 8738.

Complete.

Contains the manner of conducting the worship of Mahāvīrācārya.

Beginning:

श्रीमज्जिनेन्द्रमभिवन्द्य जगत्त्रयेशं
स्याद्वादनायकमनन्तचतुष्टयार्हम् ।
श्रीमूलसङ्घसुदृशां सुकृतैकहेतुः
जैनेन्द्रयज्ञविधिरेष मयाभ्यधावि ॥

* * * *

ओं ह्रां ह्रीं ह्रूं ह्रौं ह्रः असि आ उ सा । ओं नमोऽर्हते भगवते श्रीमते पवित्रतरं जलेन मम हस्तशुद्धिं करोमि स्वाहा ।

ओं ह्रां जलेन मम सर्वाङ्गशुद्धिं करोमि स्वाहा । ओं ह्रां जलेन मम पूजापात्रशुद्धिं करोमि स्वाहा । ओं ह्रां जलेन मम पूजाद्रव्यशुद्धिं करोमि स्वाहा ।

End:

पानीयैर्जिनराजमज्जनकृतैर्गन्धैर्जिनेन्द्रार्चितैः
स्रग्भिः श्रीजिनपूजिताभिरर्हत्पादार्चितैरक्षतैः ।
हव्यैः श्रीजिनपादपीठमहितैर्दीपैस्तमश्छेदिभिः
धूपैर्गुग्गुलुसंभवैर्बहुफलैः क्षेत्राधिपो मान्यते ॥
प्रासाम्यङ्गविधिर्जटामकुटवान् नीलाञ्जनाभः सदा
हेमं पात्रमसिं गदां च डमरुं बिभ्रचतुर्भिः करैः ।
नम्रो नागविभूषणस्त्रिणयनः श्रीजिनपूजार्चितः
सिन्दूराङ्कितमौलिरिष्टफलदः क्षेमं क्रियात् क्षेत्रपः ॥
आशीर्वादः ॥

No. 8756. ज्वरशान्तियन्त्रपूजा.
JVARAŚĀNTIYANTRAPŪJĀ.

Pages, 7. Lines, 5 on a page.

Begins on fol. 45*b* of the MS. described under No. 8746.

Complete.

Deals with the drawing and sanctification of a Yantra (mystic diagram) which is considered to have the power of curing one of severe fever and freeing one from danger of any kind.

Beginning:

हंसावृताभिधानं मलवरषष्ठस्वरान्वितं कूडम् ।
बिन्दुयुतं स्वरपरिवृतमष्टदलाम्भोजमध्यगतम् ॥
तेजोऽर्हं सोमसुधा हंस स्वाहेति दिग्दलस्य विलिखेत् ।

*   *   *   *

श्रीपार्श्वनाथस्सहितं करोति दाहज्वरे लोपितमन्त्रखण्डे ।
तदालिख्यापायत्कांस्यभाजने महादाहज्वरगस्तं तत्क्षणेनोपशाम्यम् ॥

End:

बहिरर्चयेत् समन्तात् गन्धाक्षतकुसुमचरुकाद्यैः ।
क्रूरारिमारिशाकि[नी]न्युरगनवग्राहपिशाचचोरमयम् ।
अपहरति तत्क्षणादिह तत्सलिलद्रवसमासिक्तः ॥

No. 8757. तीर्थकरपूजा.
TĪRTHAKARAPŪJĀ.

Pages, 20. Lines, 7 on a page.

Begins on fol. 58a of the MS. described under No. 8738.

Complete.

Contains the manner of worshipping the 24 Tīrthaṅkaras.

Beginning:

आदिनाथोऽस्तु वः स्वस्ति स्वस्ति स्तादजितेश्वरः ।
शंभवो भविता स्वस्ति भूयात् स्वस्त्यभिनन्दनः ॥

* * * *

स्वस्तिमन्तं स्वयं वश्वत् सन्तु स्वस्त्ययनं जिनाः ।
एतत्सप्तकं पठित्वा पुष्पाञ्जलिं क्षिपामि स्वाहा ॥

End:

द्वासप्तति तीर्थकृतां त्रिकाले त्रिषष्टिसङ्ख्यां पुरुषोत्तमानाम् ।
त्रिलोकसाम्राज्यरमाधिपानां पुष्पोच्चरार्घ्यैर्महयामि देवान् ॥

ओं ह्रीं त्रिकालत्रिलोकभव्यजनमहितद्वासप्ततितीर्थकरपरमदेवेभ्यः महार्घ्यं निर्वपामि स्वाहा ॥

No. 8758. तीर्थङ्करयजनक्रमः.
TĪRTHAṄKARAYAJANAKRAMAḤ.

Pages, 10. Lines, 7 on a page.

Begins on fol. 83a of the MS. described under No. 8738.

Incomplete.

Similar to the above.

Beginning:

येऽमी संप्रति कालभव्यजनता दृष्टामरेन्द्रैर्मुदा
कल्याणे वृषभादयो जिनवराः संपूजितास्तानिह ।
त्रैलोक्याधिपतीन् यजाम्यतिशयोपेतांश्चतुर्विंशतिं
शान्त्यर्थं जगतां चराचरगुरूंस्तीर्थकरान् सांप्रतम् ॥

* * * *

ओं श्री वृषभ अजितवर्तमानकालचतुर्विंशतितीर्थंकरपरमदेवान् स-
लिलमलयजशतककुसुमसांनाय्यप्रदीपधूपफलस्तवकशान्तिधाराद्यष्टमङ्गलद्र-
व्यैराराधयामि स्वाहा । ठकारवलयाभ्यन्तरे च सोमयमवरुणधनदजिन-
वेदिद्वारपालनियुक्ताः स्वस्वमिहेत्यनुयोगं कुर्वस्मिन्.

End:

यद्दुं कुक्कटसर्पगात्रिफणकोत्तंसा द्विषां यात्तषट्-
पाशादी सदसत्कृते च धृतशङ्खास्यादिदोश्चयष्टगा ।
तां शान्ता व(म)रुणां स्फुरच्छृणिसरोजन्माक्षमालाम्बरां
पद्मस्थां नवहस्तकप्रमुनुतां यायज्मि पद्मावतीम् ॥

* * * *

भगवन् दुर्मार्गविनाशन परसन्मार्गपरिपालक यक्षेश्वर स्वाहा ॥

No. 8759. तीर्थकरपूजाविधानम्.

TĪRTHAKARAPŪJĀVIDHĀNAM.

Pages, 63. Lines, 5 on a page.

Begins on fol. 94*b* of the MS. described under No. 8754.

Incomplete.

Similar to the above.

Beginning:

अथा(ष्ट)दलकमलपत्रे पूर्वदिशि सिद्धपरमेष्ठिपूजाविधानम् ।

आह्वानं स्थापनं चारु संनिधीकरणं मुदा ।
कुर्वे श्रीसिद्धनाथस्य गन्धतण्डुलपुष्पकैः ॥

ओं ह्रीं अर्हं अनाहतविद्यायै लसिंआऊपसिद्धपरमेष्ठिन्नत्रैहि । सं
वौषट् । अत्र स्वस्थाने तिष्ठ तिष्ठ ठ ठ मम संनिहितो भव ।

End:

तैर्यैर्गन्धाक्षताद्यैर्भवभयहरणं पूजयित्वा जिनेन्द्रं
यन्त्रं धृत्वा जिनाह्वे(ह्ने) व(म)नुसहितशतैः श्वेतपुष्पैः प्रधानैः ।
जैनं मुद्रां च धृत्वोत्तरदिगभिमुखः सुश्रु(ष्ठु) पद्मासनस्था(स्थः)
पार्श्वध्यानावलम्बी कुरु परमजपं लभ्यते कार्यसिद्धिम् ॥

* * * *

यः सत्केवलबोधबोधितजगद्रागादिदोषारिजि-
द्गीर्वाणादिनरेन्द्रवन्द्यकलिकुण्डोद्दण्डपार्श्वप्रभुः ।
भक्त्या येऽनुपठन्ति तस्य जयमालां तां सुभव्याः सदा
ते यान्त्यक्षयमाप्तचारुकमलाकृत्वाष्टकर्मक्षयम् ॥

Colophon:

इति कलिकुण्डजयमाला ॥

No. 8760. नवग्रहपूजा.

NAVAGRAHAPŪJĀ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 7*a* of the MS. described under No. 8735.

Complete.

Gives the manner of performing the worship of the nine Grahas commencing with the sun.

Beginning:

प्राचीश्वतस्रोदीचीश्राग्रेमास्त(ग्नेः प्राक्त)ण्डुलं लिखेत् ।
नवान्तराय जायन्ते गृहस्थानाग्नि(नि)तेषु वै ॥
मध्ये वृत्तं रवेरिन्दोराग्नेय्यां चतुरश्रकम् ।
याम्ये त्रिकोणं भौमस्य रौद्रे सौम्यस्य बाणवत् ॥

* * * *

आदित्याय रक्ताय रक्ताम्बरवासाय रक्तच्छत्रध्वजरथपताकाशोभिताय आरूढं मेरुं दिव्यं प्रदक्षिणं कृत्वा आवाहये । ग्रहमण्डलं प्रविशामि । काश्यपगोत्रकलिङ्गदेश आदित्यमावाहयामि ।

End:

केतुश्चित्रश्चित्राम्बरवासाय जैमिनिगोत्रमध्यदेशकेतुमावाहयामि ।

Colophon:

इति आदित्यादिनवग्रहपूजा समाप्ता ॥

No. 8761. नागबलिपूजा.

NĀGABALIPŪJĀ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 4*a* of the MS. described under No. 8735.

Complete.

Gives the manner of conducting the worship of the eight Nāgas as a preliminary ceremony to marriage.

Beginning:

माङ्गल्यवाद्योदितदिव्यनादैः श्रीमज्जिनाशीर्वचनैर्जयेति ।
श्रीनागबल्यर्थमुदारभूमौ सद्रत्नपुष्पाञ्जलिमुत्क्षिपामि ॥

* * * *

गङ्गादितीर्थोद्भववारिसिक्तां कर्पूरकाश्मीरसुगन्धलिप्ताम् ।
पुष्पौघसद्गन्धवतीं धरित्रीं श्रीनागबल्यर्थमिहार्चयामि ॥

* * * *

मध्येऽष्टपत्राम्बुरुहेऽष्टनागान् तत्कर्णि(का)यां च विचित्रकुम्भम् ।
संस्थाप्य ब्रह्माणमिहात्र मध्ये बाह्ये दिगीशानपि चाष्टसंख्यान् ॥
प्रशस्तदर्भान् परमानुरागात् स्वीकृत्य विघ्नप्रशमाय साग्रान् ।
विधिप्रदेशे बहिरष्टदिक्षु क्षिपामि सन्नागबलीविधाने ॥

End:

श्रीमद्विवाहोदितशास्त्रमार्गविधानविघ्नौघनिवारणार्थम् ।
वधूवराद्युत्तमसत्फलार्थं सर्वान् दिगीशान् परिपूजयामि ॥

No. 8762. पञ्चदशतिथिदेवतार्चनम्.

PAÑCADAŚATITHIDEVATĀRCANAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 8739.

Wants beginning.

Gives the manner of conducting the worship of the deity presiding over each lunar day of the bright or dark fortnight.

Beginning:

. . . . . . वन्दितपद्ममशिम् ॥ पन्नग ।
. . . . खड्गपरमङ्कुशमक्षमालां कशां दधानं डमरुं तथैव ।

* * * *

शूलं कपालं च दधत्त्रिणेत्रः सिंहाधिरूढो नवमीदिनेशः ।
बालार्कसङ्काशतनुप्रकाशः श्रीविश्वमाली भवतु प्रपूज्य(:) ॥
विश्वमाली ।

End :

पिण्डाशिनी पञ्चदशीदि(ने)शः कोदण्डबाणाभयपाशहस्तम (?)।
वेदण्डपत्रं कमनीयगात्रं शशाङ्कवर्णं महयामि यज्ञे ॥
पिण्डाशिनी ।

इत्थं योग्यमहोपचारविधिना यज्ञांशसंप्रीणित-
प्राणित्राणितदर्हदाङ्कनखरज्योतिस्स्फुरन्मौलिकाः ।

* * *

. . . . गृह्णन्तु पूर्णाहुतिम् ॥ पूर्णाहुतिः ।

Colophon :

इति पञ्चदशतिथिदेवतार्चनम् ॥

No. 8763. पञ्चपरमेष्ठिपूजा.

PAÑCAPARAMEṢṬHIPŪJĀ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 1a of the MS. described under No. 8735.

Incomplete.

How the five Brahmans generally recognised by the Jains should be worshipped is given here.

Beginning :

ओं ह्रूं नमः सूरिभ्यः पञ्चेन्द्रियविषयरहितेभ्यः पञ्चविधाचार-निरतेभ्यः जलं निर्वपामि स्वाहा ।

ओं ह्रौं नमः पाठकेभ्यः व्रतसमितिगुप्तियुक्तेभ्यः कषायाति(दि)-रिपुवर्गजितृभ्यः जलं निर्वपामि स्वाहा । ओं ह्रः नमः साधुभ्यः मूलो-त्तरगुणवित्तेभ्यः परम[द]दत्तचित्तेभ्यः जलं निर्वपामि स्वाहा । गन्ध इत्यादि । ओं ह्रीं नमः पञ्चपरमेष्ठिभ्यः ह्रां ह्रीं ह्रूं ह्रौं ह्रः सर्वशान्ति कुरु अर्घ्यं निर्वपामि स्वाहा । शान्तिधारापुष्पाञ्जली इत्यादि ।

End:

स्याद्वादप्राज्यराज्यप्रतिभटरहिताः स्वाम्यवत्सार्वभौमाः
येऽर्हन्तो ये च सिद्धा निजसुखनिय(ल)या निष्ठितार्था निरन्ताः।
पञ्चाचारैकताना गणवरवृषभा ये च ये पाठकेन्द्राः
ये मान्याः साधुसिंहास्तदखिलपरमश्रीगुरूनर्घ(र्ह)यामि ॥
अर्घ्यम् ॥

शान्तिं चक्रुरनन्तसंसृतिमहादावोग्रदावानल-
ज्वालाजाल्दुरन्तदुःखविपदस्तेषां परेषामपि ।
ये कुर्वन्ति च सर्वलोकमहितास्तेषां गुरूणामहं
पञ्चानां रचयामि पादपुरतः श्रीशान्तिधारामिमाम् ॥
शान्तिधारा ।

कमलवकुलवा(मा)लोत्फुल्लकल्हारमल्ली-
कुमुदकुरवकोद्यद्यूथिकाकेतकीनाम् ।
मरुवकदमनानां मञ्जरीं प्रोत्क्षिपामो
वरचरणपुरस्तात् पञ्चधा श्रीगुरूणाम् ॥ पुष्पाञ्जलि(:) ।

No. 8764. पञ्चमण्डलाराधनविधानम्.

PAÑCAMAṆḌALĀRĀDHANAVIDHĀNAM.

Pages, 4. Lines, 8 on a page.

Begins on fol. 99*b* of the MS. described under No. 8747.

Complete.

Gives the manner of conducting the worship of the guardian Jinas who are placed in five sheaths around the principal object of worship.

Beginning:

अथ पञ्चमण्डलस्थापितदिक्पालार्चनम् ।

श्रीमत्सर्वजनीनजैनसवनप्रत्यूहविध्वंसन-
प्रोद्भूतामतिमप्रभावविहतप्रख्यातपूजार्पित ।

स्वस्वातथ्यपरिच्छदान् दशदिशामन्यान् प्रघृष्यामितान्
दिक्पालान् जगदेकपालकविनान् धीशाध्वरे व्याह्वये ॥

End:

शिलां विशालां लवणेन विद्धां सूत्रेण बद्धां सगुडां सले(ले)पाम् ।
भोगाघपृष्ठैं दुरितौघपिष्टे वेद्याः पुरस्ताद्विनिवेशयामि ॥
ओं सर्वजनानन्दकारिणे सौभाग्यवति तिष्ठ स्वाहा ।
स्वच्छैः फलैरेनां शिलामर्चये ॥

Colophon:

इति पद्ममण्डलाराधनविधानं संपूर्णम् ॥

No. 8765. पद्मावतीपूजा.

PADMĀVATIPUJA.

Pages, 3. Lines, 5 on a page.

Begins on fol. 56 of the MS. described under No. 8735.

Incomplete.

The worship of Padmāvati, the body-guard of Pārsvanātha.

Beginning:

श्रीपार्श्वनाथजिननायकरत्नचूडा-
पाशाङ्कुशाभय(फ)लाङ्कितदोश्चतुष्का ।
पद्मावती त्रिणयना त्रिप(गु)णावताया(रा)
पद्मावती जयतु पद्मकृताधिवासा ॥

ओं ह्रीं क्रों अरुणाङ्गसर्वलक्षणसंपन्नसायुधवाहनवधूचिह्नपरिवारा नमोऽस्तु पद्मावति देवि अत्रावतर ।
एहि सं वौषट् । आह्वानम् । अत्र तिष्ठ ठ स्थापनम् ।
अत्र मम संनिहितो भव वषट् । संनिधीकरणम् ।

End:

चन्द्रागुरु(शीत)शीतदीसविमलश्रीखण्डसांमीश्रितैः
जातीकुन्दकदम्बवासितलसद्धूपैर्वरैः कोमलैः ।
देवीं रक्तसरोजकान्तिविमलां कीर्तिप्रभाभासुरां
राजीवालिविशा(लि)नी सुभगिनी पद्मावतीं प्रार्चयेत् ॥ धूपम् ।

शुम्भद्रम्भाफलौघैः पनसफलशतैर्मञ्जुलैर्मातुलुङ्गैः
जम्बूभिः शुम्भरम्भाफलवरनिवहैः कोमलैः कामधुग्भिः ।
वचाद्राक्षाकपित्थैः क्रमुकवरशतैर्दाडिमामम्रचके(म्रप्रभेदैः)
कल्याणाङ्गीं यजामा जिनचरणसरोजातमृङ्गीफलाय ॥ फलम् ।

No. 8766. पार्श्वनाथमन्त्रपूजा.

PĀRŚVANĀTHAMANTRAPŪJĀ.

Pages, 10. Lines, 7 on a page.

Begins on fol. 68a of the MS. described under No. 8738.

Complete.

On the manner of worshipping Pārśvanātha (one of the twenty-four Tīrthaṅkaras) by invoking Him with the Mantra addressed to Him.

Beginning:

काशीनाथं विश्वसेनस्य सूनुं भोगीन्द्राङ्कं पार्श्वनाथं च वाचे ।
पद्मानन्दस्वामिनं अग्निलायाः प (?)काशानं ध्वस्तघोरोपसर्गम् ॥

ओं ह्रीं श्रीं क्लीं ऐं हं परमब्रह्मन् अनन्तानन्तज्ञानशक्ते अर्हत्परमेष्ठिन् पार्श्वतीर्थङ्कर अत्रावतर सं वौ षट् । अत्र स्वस्थाने तिष्ठ । ठ ठ अत्र मम सन्निहितो भव वषट् ओं नमोऽर्हते स्वाहा ।

End:

इत्थं मन्त्राक्षरोत्थं वचनमनुपमं पार्श्वनाथस्य नित्यं
विद्वेषोच्चाटनस्तम्भनजनवशकृत्पापरोगापनोदि ।
प्रोत्सर्पज्जङ्गमस्थावरविषमविषध्वंसनं स्वायुरारो-
ग्यैश्वर्यापादि भक्त्या स्मरति पठति यः स्तौति तस्येष्टसिद्धी ॥

Colophon:

इति पार्श्वनाथमन्त्रस्तवनम् ॥

No. 8767. यक्षयक्षीपूजा.

YAKṢAYAKṢĪPŪJĀ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 42a of the MS. described under No. 8735.

Gives the manner of conducting the worship of Yakṣa and Yakṣī, the guardian deities in Jaina temples.

Beginning:

यस्य श्रीपादसेवां व्यधुरमरगणाः शङ्खभेरीमृगारि-
ध्वानाद्घण्टानिनादादहमहमिकयागत्य संभूय भक्त्या ।
तद्देवस्योरुतीर्थव्यवहृतिसमये नन्दय . . . . .
धर्मिद्रोहान् विलुम्पन् जगति नुतियुतो यक्षदेवः समेतु ॥
ओं ह्रीं क्रों प्रशस्तवर्ण ।

* * * *

सन्मङ्गलैः पूर्णघटातपत्रध्वजोल्लसच्चामरदर्पणाद्यैः ।
धर्मप्रभावप्रवणं तुर्वी(धुरी)णं धर्मानुरागेण यजामि यक्षम् ॥

End:

धूपेन निर्धूमकृशानुसंगप्रसूतधूमेन ससौरभेण ।
फलेन नानारसवर्णगन्धविपाकयुक्तेन जगन्मतेन ॥
संगीतभृङ्गारपुरस्सरेण सन्मङ्गलेनापि मनोहरेण ।
दुर्मार्गसक्ताननुशासमानां यक्ष्यामि यक्षीं वृषपक्षपाताम् ॥

No. 8768. यक्षिदेवतार्चनम्.
YAKṢIDEVATĀRCANAM.

Pages, 8. Lines, 5 on a page.

Begins on fol. 96a of the MS. described under No. 8747.

Complete.

Gives the manner of conducting the worship of the deities presiding over each lunar day for the purpose of propitiating them with a view to avoid obstacles in the regular worship of the Jinas.

Beginning:

अथ चतुरश्रमण्डलस्थापिततिथिदेवतार्चनम् ।
ये सांसिद्धिकदिव्यभूषणलसद्दिव्याङ्गदीप्त्युज्ज्वलाः
ये शिष्टाष्टगुणाश्च येऽपरिमिता बोधं भजन्त्यक्षयम् ।

ये नन्दादितिथिप्रवर्तनविधौ दक्षाश्च यक्षादयः
तानेतान् जिनयज्ञविघ्नविहतौ न्यक्षणियाक्षिक्षमान् (यक्षीय
यक्षेश्वरान्) ॥

* * * *

यक्षादितिथिदेवतानां सकलसंपत्संपादकदयामयामहायागप्रत्यूहव्यूहाति-
क्रमार्थमावाहनादिपुरस्सरं सपर्याक्रमं यथाक्रममुपक्रमामहे ।

End:

आवाहनादि . . . र् । इत्थं सारससपर्य . . तम् ।
देव्याश्च यक्ष्ये किल । पूर्णाङ्गं . . . ये ।

Colophon:

इति यक्षिदेवतार्चनम् ॥

No. **8769.** रत्नत्रयाराधनविधिः.

RATNATRAYĀRĀDHANAVIDHIḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 64*a* of the MS. described under **No. 8735.**

Complete.

The Jainas recognize three things as precious, *viz.*, Samyak Darśana (correct perception), Samyak Jñāna (true knowledge) and Samyak Cāritra (righteous conduct); the worship of these three things is described here.

Beginning:

सूक्ताञ्जनेन व्यवहारतो वा युक्तो निजात्मापि च येन वार्थो ।
सद्दर्शनज्ञानचरित्ररूपं रत्नत्रयं तत्पति कल्पयेऽर्घ्यम् ॥

ओं ह्रीं सम्यग्दर्शनज्ञानचारित्राय अर्घ्यं निर्वपामि स्वाहा । ओं ह्रीं सम्यग्दर्शनज्ञानचारित्राय एहि सं वौषट् । ओं ह्रीं सम्यग्दर्शनज्ञान-चारित्राय अत्र स्वस्थाने तिष्ठ ठ । ओं ह्रीं सम्यग्दर्शनज्ञानचारित्राय अत्र मम सन्निहितो भवत वषट् ।

End:

अर्घ्येणाव्योम्बुदूर्वादिद्रव्यसर्वस्वहारिभिः ।
द्वेधा(सद्दर्शनज्ञानचारित्राण्यर्चयाम्यहम्) ॥

इत्यर्चयन्ति ये भेदाभेदरत्नत्रयं मुदा ।
ते शिवाशादरा मुक्तश्रियो विन्द(न्द)न्तु निर्वृतिम् ॥

* * * *

व्यवहारेण सम्यक्त्वं निश्चयेन तदात्मना ॥
इति पूर्णार्घ्यम् ।

Colophon:

इति रत्नत्रयाराधनविधि(:)[मभिवन्द्यते] ॥

No. 8770. वास्तुदेवतापूजा.

VĀSTUDEVATĀPŪJĀ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 2a of the MS. described under No 8736.

Gives the manner of conducting the worship of the deity presiding over the site of a Jina temple.

Beginning:

असुरः कल्पसुराभविक्रियो गिरिनद्यादिविहारलोलुपः ।
वरुणोपान्तमहीमुपाश्रितो भजतां लोहितमन्नमुत्तमम् ॥ असुर ।
संशुद्धमार्गप्रतिरोधिवाहिनी
शोषं सदा यः कुरुते प्रभावतः ।
शोषः सपक्षीकृतवादसांपतिः
लातु प्रदातं तिलमक्षतांश्च ॥ शोष ।

End:

ब्रह्मेन्द्रवह्नियमनैरृतिवार्धिवायु-
यक्षेशशंकरपदेषु विशुद्धशालीन् ।
प्रस्तीर्य पूर्णकलशान् कुशहेमयुक्तान्
विन्यस्य बस्तरुचिरान् महयामि वास्तून् ॥
तद्वास्तुकुम्भसलिलेन जिनेन्द्रगेहं
पुण्याहघोषणयुतं कुशपल्लवाभ्यां

द्वारत्रयं शिखरगोपुरमण्डपाद्या:(न्)
सिञ्चेत् क्रमेण वरवास्तुपदासु हर्म्यै(द्या)न् ॥
अत्र विस्तरेण वास्तुहोमः कर्तव्यः ॥

No. 8771. वास्तुपदन्यासविधिः.
VĀSTUPADANYĀSAVIDHIḤ.

Pages, 89. Lines, 5 on a page.
Begins on fol. 31a of the MS. described under No. 8747.
Deals with the laying out of a temple for the Jina image.

Beginning:

अथ पार्थिव वक्ष्यामि पदन्यासविधिं शृणु ।
अवश्यं यो विधातव्यः श्रीविमानादिसंनिधौ ॥
सकलं पदमेकांशो द्विर्द्वौ यत्र तु पेचकम् ।
त्रिस्त्रयोंशाः पदे यस्मिन् तत् पदं पीठनामकम् ।
चत्वारोंशाश्चतुर्यस्मिन् महापीठं तदुच्यते ॥

* * * *

आसनं तत्पदं यस्मिन् दशकृत्वो दशांशकाः ।
पदान्येव फलैर्ज्ञेयान्यासनान्तानि नामतः ॥

End:

द्विरक्षसिद्धावसुरावहि द्वौ द्वौ वैनतेयामितिसाष्टसंख्याः ।
दौवारिकानिष्टबलिप्रदानात् पूर्वादिदिग्भागगतान् विनोमि ॥
ओं ह्रां राक्षसाद्यष्टदौवारिका आगच्छत इत्यादि । दिग्विन्यस्त-
क्षि । ऊर्ध्वादःपार्श्वे ई । श्र नं हः पाक्षि । अष्टाशीतिसुरा हृताः ।

Colophon:

इति यन्त्रदेवताविसर्जनम् ॥

No. 8772. वास्तुपदन्यासविधिः.
VĀSTUPADANYĀSAVIDHIḤ.

Pages, 9. Lines, 5 on a page.
Begins on fol. 41a of the MS. described under No. 8746.

Incomplete.

Same as the above.

See under the previous number for the beginning.

End:

इति तयोः पदमन्यतरं द्वयोः बलिविधानपुरोगबहेतवे ।
जिननिकेत[न]विधौ परिकल्पये गृहपुरादिविधौ च तथा पदम् ॥

Colophon:

इति वास्तुलक्षणं समाप्तम् ॥

No. 8773. विमानशुद्धिः.
VIMĀNAŚUDDHIḤ.

Pages, 10. Lines, 8 on a page.

Begins on fol. 3a of the MS. described under No. 8736

Complete.

Deals with the manner of sanctifying the building constructed for the Jina image.

Beginning:

अथ विमानशुद्धिप्रारम्भनिरूपणम्—

अथानम्यं विमानं चेत् तस्य संप्रोक्षणक्रिया[म्] ।
कार्या स्थपतिना पूर्वमाचार्येण तदा भवेत् ॥
प्रपदा(?)स्थपतिः कुर्यादुपपीठपदः शुचिः ।
शान्तिभिस्तत्र संस्थाप्य कुम्भांस्तद्देवतां यजेत् ॥
अधिवास्य विमावर्यामेवं तु निकटे वसन् ।
प्रभाते तज्जिनागारमारुह्य प्रीतमानसः ॥

End:

श्रीवारिगन्धकलमाक्षतचारुपुष्पनैवेद्यदीपवरधूपफलोत्तमार्घ्यैः ।
संसारदुःखपरितापनिवारणार्थं श्रीजिनगेहविधिना भुवि लोकशान्त्यै ॥
यष्टॄणां याजकानां च तदानुमतकारिणाम् ।
राज्ञि(ज)वत्पुरवर्गस्य देशराष्ट्रपुरस्य च ॥

* * * *

विमानशुद्धिहोमकुम्भचतुष्कुण्डेषु होमः कर्तव्यः । चतुरश्रवा उक्त-स्थण्डिलेषु अग्निमुखपर्यन्तं विधानमाचर्यम् ॥

Colophon:

विमानशुद्धिः समाप्तः ॥

No. **8774.** शान्तिहोमोत्सवविधिः.

ŚĀNTIHŌMŌTSAVAVIDHIḤ.

Pages, 79. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 8754.

Complete.

Describes the rituals to be performed in connection with the Śāntihōma festival in the Jina temples.

Beginning:

श्रीमत्पञ्चमसार्वभौमपदवीं प्रद्युम्नरूपश्रियं
प्राप्तं षोडशतीर्थकृत्त्वमखिलत्रैलोक्यपूजास्पदम् ।
शान्तं शान्तजिनेश्वरं त्रिजगतामश्रान्ति(न्त)शान्तिप्रदं
नत्वा शान्तिविधित्सयाद्य विदधे श्रीशान्तिहोमोत्सवम् ॥

ओं ह्रीं श्रीं क्लीं भूः स्वाहा । विधियज्ञप्रतिज्ञानाय पुष्पाञ्जलिः ।

. . . .

ओं ह्रीं सम्यग्दर्शनज्ञानचारित्राय स्वाहा—पीठार्चनम् ।

संस्थापयाम्युपरि तस्य जिनेश्वरार्चा
छत्रत्रयं जिनपतेरपसव्यभागे ।
छत्रत्रयं [मङ्गल]तदनु तस्य तु सव्यभागे
वादित्रजालव(ब)धिरे सति सर्वलोके ॥

End:

ओं ह्रीं हुं फट् केतुमहाग्रह अमुकस्य शिवं कुरु कुरु स्वाहा ।

इत्थं सारसपर्ययाद्य महिता यूयं प्रसन्नास्तु नः
साक्रान्ता विकला विमोहमुखतो युष्मत्प्रसादादियम् ।

सर्वज्ञाध्वरविघ्नमाप्नत हुतं सूर्यादिसर्वग्रहान्
पूर्णाज्ञान् विधिपूर्तिपूर्णफलदां पूर्णाहुतिं वोऽर्पये ॥

ओं ह्रीं आदित्यादिनवग्रहदेवा यष्टृप्रभृतीनां शान्तिं कुरु स्वाहा ।— पूर्णार्घ्यम् ॥

No. 8775. संकल्पपुण्याहवाचनम्.

SAṄKALPAPUṆYĀHAVĀCANAM.

Pages, 13. Lines, 7 on a page.

Begins on fol. 51*a* of the MS. described under No. 8738.

Complete.

Contains the manner of sanctifying the materials used in the worship of Jina.

Beginning:

यजमानाचार्यप्रभृतिसर्वमङ्गजनानां सद्धर्मश्रीबलायुरारोग्यैश्वर्याभिवृद्धिरस्तु । अद्य भगवतो महापुरुषस्य श्रीमदादिब्रह्मणो मते त्रैलोक्यमध्यमध्यासीने मध्यमलोके . . . . महति महावीरवर्धमानतीर्थकरोपदिष्टसद्धर्मव्यतिकरे श्रीगौतमस्वामिप्रतिपादितसन्मार्गप्रवर्तने श्रेणिकमहामण्डलेश्वरसमाचरितसन्मार्गावशेषे. . . . . . . यागमण्डपभूमिशुद्ध्यर्थं द्रव्यशुद्ध्यर्थं क्रियाशुद्ध्यर्थं पूजापात्रशुद्ध्यर्थं विधीयमाननित्यदेवपूजाविधिं विधानस्य नान्दीमुखे पुण्याहवाचनं करिष्ये ।

End:

देवपूजाक्षणे कुर्यान्मण्डलाह्वानपूजनम् ।
तद्विसर्जनकाले च मण्डलस्य विसर्जनम् ॥

सर्वे देवाः स्वस्थानं गच्छन्तु भूर्भुवः स्वाहा ॥

स जयतु जिनधर्मो यावदाचन्द्रतारं
यमनियमतपोभिर्वर्धतां साधुसङ्घः ।
अहरहरभिवृद्धिं यान्तु चैत्यालयास्ते
त्वदधिकृतजनानां क्षेममारोग्यमस्तु ॥

No. 8776. सरस्वतीपूजा.

SARASVATĪPŪJĀ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 52b of the MS. described under No. 8746.

Gives the manner of conducting the worship of Sarasvatī, the goddess of learning.

Beginning :

श्रीहेमकुम्भपरिपूरितदिव्यतोयेन
श्रीखण्डचारुघनसारसकुङ्कुमाद्येन ।
सौगन्धिगन्धकलमाक्षतपुण्यमन्येन
वासन्तिकाबकुलमालतिमल्लिकाद्येन ॥
संनद्धशुद्धपरमान्नसिताज्यभक्ष्येण
प्रालेयकादिवसनिर्मलरत्नदीपेन ।

End :

श्रीमज्जिनेन्द्रमुखपद्मविराजमानां
संपूजयामि वरभव्यसुखाय वाणीम् ॥
कोटीशतं द्वादश चैव कोट्या
लक्षाण्यशीतिस्त्र्यधिकानि चैव ।
पञ्चाशदष्टौ च सहस्रसंख्या
यवद्व्रतं पञ्चविधं नमामि ॥

No. 8777. सरस्वतीपूजा.

SARASVATĪPŪJĀ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 62a of the MS. described under No. 8735.

Wants beginning and end.

Similar to the above.

Beginning :

. . . मिलितागरुपिण्डधूपैः
रङ्गारसङ्गसुरभीकृतदिग्विभागैः ।

तां धूपयामि जिनपुङ्गववक्त्रजाते-
र्नीन्देवतां सकललोकशरण्यभूताम् ॥ धूपः ।
जम्बीरबीजकदलीक्रमुकप्रियाल-
राजादनाऽपनसारुजबीजपूरैः ।
नारङ्गतिन्दुककपित्थफलैस्सुपक्वै:
वाग्वादिनीं जिनपतेर्महयामि भक्त्या ॥ फलम् ।

End:

कर्पूरतैलपरिबोधितदीप्रदीपै-
र्ध्वस्तान्धकारनिकरैरनिरन्तदीपैः ।
लोकत्रये निखिलवस्तु निबोधयद्भि-
रचामि जैनतिलकां गिरमिन्दुवर्णाम् ॥ दीपः । श्रीखण्डरेणु.

No. 8778. सर्वचैत्यालयपूजा.

SARVACAITYĀLAYAPŪJĀ.

Pages, 20. Lines, 5 on a page.

Begins on fol. 85*a* of the MS. described under No. 8747.

Gives the manner of conducting worship in Jina temples.

Beginning:

घातिप्रक्षयजाक्षयोर्जितमहाधीसौख्यदृक्पत्तय:
कल्याणानि महान्ति पञ्च परमश्रीप्रातिहार्याष्ट(क)म् ।
प्राप्ता ये भुवनत्र . . . यैर्युक्ताश्चतुस्त्रिंशता
तानर्हाम्यहमर्हतस्त्रिजगतीसाम्राज्यलक्ष्मीपतीन् ॥

* * * *

अखिलोपासकजनमानसवारिजानन्दकृद्द्युमणीनामर्हद्दत्परमेष्ठिनामेका-
दशविधमहापूजामहं करोमि स्वाहा ।

End:

जलं निर्वपामि स्वाहा इत्याद्यष्टविधार्चनम् ।

श्रीमज्जिनेन्द्रान् वरसिद्धसूरीन्

श्रीपाठकार्यान् वरसर्वसाधून् ।

श्रीजैनधर्मान् वरशास्त्रबिम्बान्

श्रीचैत्यगेहान् प्रणमामि नित्यम् ॥

No. 8779. सिद्धचक्रपूजा.

SIDDHACAKRAPŪJĀ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 53*a* of the MS. described under No. 8735.

Complete.

Deals with the worship of the mystic diagram in which the Jina-mantra is written.

Beginning:

ऊर्ध्वाधारयुतं सबिन्दु सपरं ब्रह्मस्वरावेष्टितं

वर्गापूरितदिग्गताम्बुजदलं तत्सन्धितत्त्वान्वितम् ।

अन्तःपत्रतटेष्वनाहतयुतं ह्रींकारसंवेष्टितं

देवं . . . . ॥

एतद्वृत्तं पठित्वा सिद्धप्रतिमाग्रे पुष्पाञ्जलिं क्षिपेत् ।

ओं ह्रीं अर्हत्सिद्ध अत्र एहि सं वौषट् । अनाहतविद्यायै असिआउसा नमः सिद्धपरमेष्ठिन् नमः सिद्धपरमेष्ठिने स्वाहा । इत्यादि आह्वानम् । ओं ह्रीं अर्हत्सिद्ध अत्र तिष्ठ ठ इत्यादिस्थापनम् । ओं ह्रीं अर्हत्सिद्ध मम संनिहितो भव वषट् इति संनिधीकरणम् ।

End:

नानात्वेन सहैक्यमैक्यसहितं नानात्वमव्याहतं

बिभ्रन्नित्यमिमै(तै)रनन्तगुणमप्यष्टाभिरिष्टं गुणैः ।

ओं ह्रीमर्हमनाहतावरपराः शेषार्चनाख्यानमः-
पूते . . . कृतार्थे(र्ह)णचर्णैः श्रीसिद्धचक्रं यज ॥
इत्थं चक्रमुपास्य दिव्यवपुराह्वानादिपूर्वं ज्वल-
द्ध्यात्वानाहतमन्तरङ्गमधियन् स्वं शुभ्रतेजोमयम् ।
यः स्वाहार्हतमन्त्रमाद्यमधियन् जप्त्वा शिवाशादर-
भाक्तत्वं विधिवज्जुहोमि(ति) स यथाध्यानं फलान्यश्नुते ॥

No. 8780. सिद्धपरमेष्ठिपूजा.

SIDDHAPARAMEṢTHIPŪJA.

Pages, 2. Lines, 5 on a page.

Begins on fol. 65*a* of the MS. described under No. 8735.

Contains the worship of the Brahmans who have attained to the highest or the eighth world.

Beginning:

आहूता इव बद्धमुक्तिवनिता मुक्तान्यसङ्गा ययुः
तिष्ठन्त्यष्टमभूर्मिसौधशिखरे सानन्दसौख्यास्सदा ।
साक्षात्कुर्वत एव सर्वमनिशं सालोकलोकं समं
तानद्धेद्धविशुद्धसिद्धनिकरानावाहनाद्यैर्भजे ॥

ओं ह्रीं श्री श्री सिद्धपरमेष्ठिन् एहि सं वौषट् ।

ओं ह्रीं सिद्धपरमेष्ठिन् स्वस्थाने तिष्ठ ठ । ओं ह्रीं सिद्धपरमेष्ठिन् मम सन्निहितो भव वषट् ।

End:

णयेण णाणंणयसज्जमेण तवेण उड्डीणय सञ्जमेण ।
सिद्धोतिकाले सुविशुद्धबुद्धे समच्चयामो सयळे विसुद्धे ॥

* * *

सिद्धभट्टारकव्रातं भूयो भूयो नमोऽस्तु ते ॥

INDEX.

[NOTE.—The names printed in italics are those of the works described.]